॥ अथ योगचिंतामणिः प्रारंभः ॥

श्रीगणेशायनमः श्रीकृष्णायतुभ्यंनमः॥नमोगुरूभ्योदेवेभ्योयोगिभ्योहरयेनमः नित्यं
सूक्ष्मतरंविदेकरसंकमुक्तंविशुद्धंशिवंनिर्द्वंद्वाखिलकल्पनंश्रुतिशिरोगम्यंप्रमाणोज्झितं॥
पूर्णंधामवशीकृतासुमनसः पश्यंतियद्योगिनः सांद्रानंदमुपास्महेतदनिशंस्वात्मप्रकाशंम
हः १ मायागाढमहादुरत्ययतमोमार्तंडकोटिप्रभः॥संसाराख्ययुगांतभास्करकरव्यात
त्यपूर्णेदुकः॥दुःखाब्धेर्युगांतचंद्रपवनःकारुण्यलावण्यभूर्भूयान्मेनिरवित्तार्थबोधन
करःश्रीदक्षिणामूर्तिकः॥२॥विघ्नौघध्वांतानलमंत्रिकाशंचिंत्यार्थचिंतामणिचारुमूर्ति॥ब्रह्मा
च्युतेशादिसमर्च्चितांघ्रिंनमामिलंबोदरमुग्रवीर्यम्॥३॥श्रीव्यासयतिशंकरंभवगुरुंश्रीराम
चंद्रंगुरूं॥सांद्रानंदपदांबुजंचनिखिलान्नत्वाहियोगीश्वरान्॥नानाग्रंथपयोधिमध्यपतित
श्रीयोगचिंतामणिं॥निःशेषार्थसमर्पकंयतिशिवानंदःकरोतिस्फुटम्॥४॥योगस्तन्निर्विकल्पकस १

मधिरेव॥तथाचाहपतंजलिःयोगश्चित्तवृत्तिनिरोधइति मनोवृत्तीनां वाह्यार्थाभिमुखानांनि
रोधपूर्वकंचित्तस्यपरब्रह्माकारतयावस्थानंसनिरोधाख्योनिर्विकल्पकसमाधियोगइत्यु
च्यते॥व्याकरणेयुजसमाधाविति॥वासिष्ठेपिह्येकमोक्षिनाशायोगोज्ञानंचराघव॥योग
स्तद्वन्निरोधःस्याज्ज्ञानंसम्यक्परीक्षणमितिकूर्मपुराणेईश्वरोक्तिः॥मय्येकचित्ततायोगः
दृत्यंतरनिरोधतः॥श्रुत्यंसर्वनिर्मोक्षेसंस्वरूपेयत्रचिंत्यते॥अभावयोगःसमुक्तोयेनात्मानं
प्रपश्यति॥यत्रपश्यतिचात्मानंनित्यानंदंनिरंजनं॥मामेकं तुपरोयोगोभाषितःपारमेश्वर
इति॥आदित्यपुराणे॥योगात्संजायतेज्ञानंयोगोमय्येकचित्ततेति॥योगबीजेव्युषाच॥योगः
कइत्युच्यतेदक्षयोगाभ्यासोपिकीदृशः॥योगेनयाभवेत्किंचतत्सर्ववदशंकर॥ईश्वरउवाच॥योऽपान
प्राणयोर्योगःस्वरजोरेतसोस्तथा॥सूर्याचंद्रमसोर्योगोजीवात्मपरमात्मनोः॥एवंतुद्वंद्वजालस्य

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

संयोगोयोगउच्यतइति॥अत्रजीवात्मपरमात्मनोरैक्यनिर्बीजसमाधिर्लक्षणं॥संयोगोयोगइत्युच्यतेअन्येतुतदंगभूताद्वैनिष्टयं॥विस्तरेणचवक्ष्यते स्कंदपुराणे॥वृत्तिहीनंमनःकृत्वाक्षेत्रज्ञंपरमात्मनि॥एकीकृत्यविमुच्येतयोगयुक्तःसउच्यते॥बहिर्मुखानिसर्वाणिकृत्वात्वांतराणिवै॥मनसैवेंद्रियग्रामंमनश्चात्मनियोजयेत्॥सर्वभावविनिर्मुक्तंक्षेत्रज्ञंपरमात्मनि॥एतद्ध्यानंचयोगश्चशेषोऽन्योग्रंथविस्तरः॥संयोगस्त्वात्ममनसोर्योगइत्युच्यतेबुधैःप्राणापानसमायोगोयोगइत्यपिकेचन॥विषयेंद्रियसंयोगोयोगइत्यपिपंडितैरितिःप्राणायामस्यसर्वयोगशास्त्रेषुयोगांगत्वेनप्रसिद्धत्वान्नयोगत्वं॥अतएवइत्यपिकेचनेतिमतांतरोपन्यासोऽस्वरसोभ्यूहनार्थमेव॥विषयेंद्रियसंयोगेत्यनादानुसंधान्भ्रू ग्रामः
ग्राणादिनिरीक्षणमभिप्रेतंनेत्रेरपिसमाधिसंभवस्यतेषांतत्रैवयोगिभिरुक्तत्वात्॥विस्त २

रेणवक्ष्यते॥विष्णुपुराणे॥योगस्वरूपंचवक्ष्यतेमम॥यत्रस्थितोनच्यवतेप
सा त्ययोगत्वयोमुनिः॥आत्मप्रयत्नापेक्षाविशिष्टायामनोगतिः॥तस्माद्ब्रह्मणिसंयोगोंगइत्य यो
भिधीयते॥एवमत्यंतवैशिष्ट्ययुक्तधर्मोपलक्षणः॥यस्मयोगःसवैयोगीमुमुक्षुरभिधीयते॥अयमर्थःपराक्प्रवणस्यविषयाभिमुखप्रवृत्तिशीलस्यांतः करणस्यविषयेभ्योनिवर्त्यप्रत्यग्मुखीकरणात्मप्रयत्नसापेक्षाविशिष्टाजीवरूपेणव्याख्यातामनसाकारणभूतेनोत्यादितायागतिर्ज्ञानंतस्यागतेर्ब्रह्मणिविषयेयश्चसंयोगोजीवस्यब्रह्मभेदचिंतनात्ससंप्रज्ञातलक्षणः समाधिरुक्तइतिद्वयोरर्थः॥तृतीयार्थस्तु॥एवंभूताभ्यासशालिनोविष्ण्वाख्यपरब्रह्मणिमनः॥प्रयत्नेसत्यांतनवैशिष्ट्ययुक्तधर्मोपलक्षणःस्वयंस्यायोगिनोयोगोभवतिससाक्षान्मोक्षसाधनयोगाभ्यासशालित्वाच्छास्त्रेषुमुमुक्षुरित्यभिधीयते॥अन

नासंप्रज्ञातलक्षणःसमाधिरुक्तः।पद्मपुराणेऽपि योगस्त्वयंधातुर्गतःकाष्ठांपरांस्थितिं॥सात
स्ययुज्यतेयस्मात्तस्माद्योगीसउच्यते॥परांस्थितिंजीवब्रह्मणोरद्वैतसाक्षात्कारख्यांगतः॥सा
धातुर्नतुयोगमात्रंसास्थितिस्तस्माद्वैताभ्यासशालिनोयुज्यतेयतः सास्थितियुज्यतइति यु
ज्यत्याख्योगउच्यते॥अनेनासंप्रज्ञातसमाधिरुक्तः॥तयातत्रैवनिरोधोयस्तुमनसःसयोगोयो
गिनोमतः अनेननिर्विकल्पउक्तः याज्ञवल्क्यः॥तानंयोगात्मकंविद्धियोगश्चाष्टांगसंयुतः॥संयो
गोयोगइत्युक्तोजीवात्मपरमात्मनोरिति॥अनेनमनःप्रलयात्मयलक्षणोसंक्षेपतःसंप्रज्ञातासं
प्रज्ञातावुक्तौ॥स्मृतौविष्णुधर्मेपरेणब्रह्मणासार्द्धमेकत्वंयन्नरात्मनः॥सराजयोगोविख्यातः
किमन्यद्योगलक्षणं॥स्वदेहारंभकस्यापिकर्मणःसंक्षयावहः॥योयोगःपृथिवीपालश्रृणुतस्या
पियत्फलं॥यत्तद्ब्रह्मपरंलोकेविद्यास्वंशुद्धमव्ययं॥चेतसःप्रलयस्तत्रयोगइत्यभिधीयते॥

योगजेनाववोधेनप्रलीनेतत्रचेतसि॥रूपकारणभावोभेदेनैवानुपश्यति॥परात्मनोर्मनुष्यं
द्रंविभागोज्ञानकल्पितः॥क्षयेचेतस्यात्मपरयोर्विभागाभावएवहि॥परमात्मात्मनोर्योयमविभा
गःपरंतप॥सएवतुपरोयोगःसमासात्कथितस्तव॥अत्रपरेणब्रह्मणेत्यादिनासंप्रज्ञातल
क्षणः समाधिरुक्तः देहारंभकस्येत्यादिनाऽसंप्रज्ञातलक्षणः समाधिरुक्तःननुयमनिय
मासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टावंगानियोगस्येत्यादिसर्वयोग
शास्त्रेषुसमाधेर्योगांगत्वेनगणितत्वाद्योगःकश्चिदन्यएवप्रतीयतइतिचेत्सत्यं॥समाधि
र्हिद्विविधोस्ति॥संप्रज्ञातासंप्रज्ञातभेदात्॥तत्रासंप्रज्ञातसमाधेःसंप्रज्ञातसमाधिरंगं अ
त्रांगिव्यवस्थाकृतापातंजलैः॥धारणादीनांत्रयाणांसाक्षादुपकारकत्वेनांतरंगत्वमुक्तं
॥यमादीनांतुपंचानामपिप्रतिपक्षभूतहिंसादिवितर्कोन्मूलनद्वारेणसमाध्युपकारकत्वा

द्वहिरंगत्वमुक्तं तत्रायासनादीनामुत्तरोत्तरमुपकारकत्वं॥ स्थास्नजयेप्राणस्थैर्यमित्यादि
॥तथाधारणाध्यानयोः संज्ञानसमाधिनिष्पादनयेतरांगापेक्षयांतरंगत्वेप्यसंप्रज्ञातव्यूः
निर्बीजसमाधिप्रतिपादंपर्येणोपकारत्वाद्बहिरंगत्वंत्रयमंतरंगंपूर्वेभ्यः तदपिबहिरंगंनिर्बी
जस्यानिसूत्राभ्यां वशिष्ठयाज्ञवल्क्यातुयमादीनां चतुर्णांबहिरंगत्वं॥प्रत्याहारादीनांचतुर्णा
मप्यंतरंगत्वमाह॥ याज्ञावल्क्यः आदौचत्वारिबाह्यानितदन्यांतराणिवै॥ उक्तान्येतानिच प्र
त्वारियोगांगानिवरानने॥वशिष्ठःप्रत्याहारादिचत्वारिश्रुणुष्वांतराणिचेति॥अत्रेदंज्ञेयं
यमादीनिध्यानांतानिउत्तरोत्तरोपकारकत्वेनसंप्रज्ञातसमाधिसंपादकत्वेनबहिरंगानिर्बी नि
जसमाधेःसंप्रज्ञातसमधिरेवांतरंगमिति॥सम्यक्प्रकर्षेणज्ञायतेसंशयविपर्ययानध्य रामं०
वसायराहित्येनभाव्यस्वरूपंयेनससंप्रज्ञात समाधिर्भावनाविशेषःभावनाविशेषो ४

यश्चेतिससंप्रज्ञातसमाधिरुक्तः॥सचवितर्कादिभेदाच्चतुर्विधःसवितर्कश्चसविचारःसानं
दःसास्मितश्चेतितयाचभगवान्पतंजलिःवितर्कविचारानंदास्मितारूपानुगमात्संप्रज्ञातर
तिभावनाचविषयांतरय रिहारेणाभ्यस्यचेतसिपुनः पुनर्निवेशनं भाव्यंतुद्विविधंरश
स्तत्वानिचतत्वान्यपिद्विविधानिजडानि अजडंच जडानिचप्रकृतिर्महदहंकारैकादशेंद्रिय
पंचतन्मात्रपंचभूतभेदाच्चतुर्विंशतिःसंक्षेपतस्तत्प्रकृतिरवर्णेश्वरशक्तिरितिमायेतिच या
व्यपदिश्यते॥देवात्मशक्तिंस्वगुणैर्निगुंढांमायांतुप्रकृतिंविद्यान्मायिनंतुमहेश्वर मित्या
दिश्रुतिषुअंजउःपुरुषःजडान्यपिद्विविधानिस्थूलानिसूक्ष्माणिच तत्रयदा प्रथमंस्थूलानि स
महाभूतेंद्रियाणिविषयत्वेतादा भावनाक्रियतेपूर्वापरानुसंधानशून्यंस्वरूपमात्रावसंभेदननदा
सवितर्कं संज्ञितः समाधिर्भवेदिति॥पूर्वापरानुसंधानशून्यंस्वरूपमात्रावसंभेदननदा सवि

संज्ञितः तथासूक्ष्मांतःकरणवीषयमालंब्यदेशकालधर्मावच्छिन्नाभावनायेत्तदासविचारसंज्ञि
तस्तदनवच्छिन्नाधर्मिमात्रविषयायेत्तदानिर्विचारारव्यःसमाधिरयंप्राज्ञसमापत्तिरित्यभिधी
यते॥यदारजस्तमोलेशानुविद्धमंतःकरणसत्वंभाव्यतेनदागुणाभावाच्चितिशक्तेःसुरूप
काशमयसत्वस्योद्रेकात्सानंदारव्यःसमाधिर्भवति॥एतन्मात्रधृतयश्चविदेहाइत्यु
च्यंते॥अयंचग्रहणसमापत्तिरित्युच्यंते॥अतःपरंरजस्तमोलेशानभिभूतंशुद्धसत्व
मात्रंवनीकृत्यैथाप्रवर्तते॥भावनातस्याग्राह्यस्यसत्वस्यन्यूनाभावाच्चितिशक्तेरुद्रेका
त्तत्तामात्रंवशेषत्वेनसमाधिःसास्मितइत्युच्यतेनचाहंकारास्मितयोरभेदःशंकनीयः॥य
त्रांतःकरणमहमित्युल्लेखेनविषयान्वेष्यतिसोहंकारोयत्रत्वंतमुरूपतयाप्रतिलोमपरिणा
मेनप्रकृतिलीनेचेतसिसत्तामात्रमवभासतेसास्मितइति॥एतन्मात्ररूपतयस्फुप्रकृतिलय

शब्दवाच्या॥येतुपरंपुरुषंज्ञात्वाभावनायांप्रवर्तंतेतेषामियंविवेकख्यातिर्गृहीतस
मापत्तिरित्युच्यते॥चतुरवस्थोयंसंप्रज्ञातसमाधिःसविकल्पइतिसबीजइतिनिदध्यासन
मित्यादिशब्दैर्व्यपदिश्यतेयोगशास्त्रेषु॥असंप्रज्ञातसमाधेर्लक्षणमाहभगवान्पतंजलिः
विरामप्रत्ययाभ्यासपूर्वःसंस्कारशेषोऽन्यइति॥अस्यार्थःविरम्यतेऽनेनेतिविरामोविव
र्कादिचिंतात्यागोविरामश्चासौप्रत्ययश्चेतिविरामप्रत्ययस्तस्याभ्यासःपौनःपुण्येनचेतसि
निवेशनं॥तत्रयाकाचित्तवृत्तिरुल्लसतितस्यानेनानेनैरंतर्येणपर्युपासनंतत्पूर्वकः
समाधिःसंस्कारशेषोऽन्यस्तद्विलक्षणोऽसंप्रज्ञातसमाधिरित्यर्थः ननुकिंचित्संप्रज्ञा
तइतिअसंप्रज्ञातसमाधिःअयंनिर्बीजइतिनिर्विकल्पइतिनिरालंबइतिराजयोगइति
चोच्यते॥राजयोगंधामदेवउवाच॥भगवन्देवदेवेशपरमानंदसुंदर॥त्वत्प्रसादान्मयालब्धः

योग० पूर्वयोगः सविस्तरः अपरः कस्तमाख्याहि भवतोदीरितः॥महादेव उवाच॥बहिर्मुखान्वितः पूर्वो बहि
र्योगश्चतन्मयः अंतर्मुखान्वितस्त्वन्योलयांतर्योगः सराबहि॥राज योगश्च कथितः सरावमुनिपुग
वैः राजतेसर्वयोगेषुराजयोग इतिस्मृतः राजनंदीप्यमानंतत्ब्रह्माणमव्ययं॥देहिनंत्रयय र
स्कं राजयोगः सउच्यते॥समाधिद्वयसाधारणनामानिहठप्रदीपिकायांराजयोगःसमा
धिश्चउन्मनीचमनोन्मनी॥अमरौघोबचांद्रीवनिरालंबनिरंजनं॥अमनस्कोलयश्चैवशु
न्याशून्यंपरामरंजीवन्मुक्तिःसहजंचतुर्यंचेत्येकवाचकमिति॥दर्शितंचोदात्तपुराणा
दिवाक्येषुसमाधिद्वैविध्यंपूर्वमेव॥ननुमंत्रयोगोलयश्चैवराजयोगोहठस्तथा॥योगश्चतु
र्विधःप्रोक्तोयोगिभिस्तत्वदर्शिभिरितियोगस्यचतुर्विधत्वश्रवणात्ब्रह्मविष्णुईश्वरशि
वादिगीतादिषुकर्मयोगोभक्तियोगोवैराग्ययोगः सांख्ययोगइत्यादिषुयोगशब्दप्रयोगे

MEMORIAL

[redacted] दर्शनेचनयोगशब्दस्यनिकार्यत्वप्रतीतेःकथंनि
र्णयोयमेवयोगइतिचेत्॥सत्यं॥जीवनसाधनेलांगुलेजीवनशब्दप्रयोगवत्साक्षात्परंपर
यायोगसाधनेषुमंत्रयोगादिषुयोगशब्द[redacted]प्रयोगोपपत्तेः तथाहि॥मंत्र
जपहोमपूजादिसमाराधितेश्वरप्रसादद्देवयोगोयोगवत्साक्षात्परंपरयायोगसाध
नेषुमंत्रयोगादिषुयोगशब्दप्रयोगोपपत्तेः तथाहि॥मंत्रजपहोमपूजादिसमाराधितेश्व
रप्रसादादेवयोगोयोगसिद्धिश्चभवतिनान्यथा॥आदित्यपुराणेशिववाक्यं॥सर्वतःपरिपू
र्णश्चजरामरणवर्जितः॥मत्प्रसादादवेद्योगीनान्यथाकोवसूदनेति॥मानसोल्लासेगुरुम
सादाल्लभतेयोगमष्टांगलक्षणं॥शिवप्रसादाल्लभतेयोगसिद्धिंचशाश्वतीमिति॥शैवे॥ब्रह्मवि

मुशिवादीनांमंत्रजाप्यविशारदैः साध्यतेमंत्रयोगस्तुवत्सराजादिभिर्यथेति॥ कूर्मपुराणे
ज्ञानार्थीमोक्षार्थीचविशेषतः संसरेद्धि विरूपाक्षंमर्त्युसंसारमेषजमिति॥ किंचेश्वरमंत्रजप
पूजादीनांसर्वयोगशास्त्रेषुयोगांगत्वंस्पष्टमेवदृश्यतेतथाचवक्ष्यते॥ राजयोगस्तुनिर्बीज
समाधिरेवलयः संप्रज्ञातः॥ हठस्तुप्राणायामाद्यंतथाचयोगबीजे॥ मंत्रोहठोलयोराजयोगे
स्तास्त्रभूमिकाः क्रमात्॥ एकएवचतुर्द्धायंमहायोगोभिधीयते॥ देव्युवाच॥ कथयेदंमहादेवयो
गतत्त्वंचतुर्विधं॥ भूमिकांशानुसारेणयथाभूतंक्रमान्मम॥ ईश्वरउ०॥ सकारेणबहिर्यातिह
कारेणविशेन्मरुत्॥ हंसहंसेत्यमुंमंत्रंजीवोजपतिसर्वदा॥ गुरुवाक्यात्सुषुम्णायांविपरीतोभ
वेज्जपः॥ सोहंसोहमितिप्रा नेमंत्रयोगस्तदोच्यते॥ प्रतीतिर्मंत्रयोगाच्चजायतेपश्चिमेप
थि॥ हकारेणतुसूर्योसौठकारेणेंदुरुच्यते॥ सूर्याचंद्रमसोरैक्यंहठइत्यभिधीयते॥ हठेनग्रस्प

नेजा सर्वदोषसमुद्भवं॥ क्षेत्रज्ञःपरमात्माचतयोरैक्यंयदाभवेत्॥ तदैक्यसाधितेदेविचिंतया
तिविलीनतां॥ पवनःस्थैर्यमायातिलययोगोदयेसति॥ लयात्संजायतेसिद्धिःस्वानंदंपरमंप
दंअणिमादिपदंप्राप्तेराजनेराजयोगतः॥ प्राणापानसमायोगेज्ञेयंयोगचतुष्टयं॥ पूर्वेबाह्यामं
त्रयोगःप्रोक्तोयंत्वांतरइतिविशेषः॥ सूर्यचंद्राख्ययोःप्राणापानयोरैक्यलक्षणःप्राणायां
मोहठयोगइत्युच्यते॥ वासिष्ठे॥ अयंतश्चंद्रमादेहमाप्यायतिवाखतः॥ प्राणःसूर्योथवाप्यग्निः
पचत्यन्नंदिनेदिनं॥ मतांतरेतुविपरीतासंज्ञातयोः यथाश्रमतसिद्धौ॥ प्राणश्चंद्रमयोर्ज्ञेयोपानः
सूर्यमयस्तथा॥ उभौशरीरनेतारौयानायातंप्रकुर्वतः॥ अनयोर्यत्नतोयोगस्तदाभ्यस्यामुमु
क्षुभिः॥ एतद्वारेणधीराणांसर्वसिद्धिःप्रजापते॥ प्राणापानगतीरुध्वाप्राणायामपरायण
इतिगीताचवचनात्॥ प्राणायामसमायोगःप्राणायामइतिस्मृतिरितियाज्ञवल्क्यवचनाच्चप्राण

यामपदंहठशब्देनोच्यते॥यस्मांभावनायांपरमात्मनिलीनस्ययोगिनोब्रह्मानंदाविर्भावोजायतेस
भावनाविशेषः॥संप्रज्ञातलक्षणःसमाधिर्ल्लयेयोगइत्युच्यते॥लययोगेपिनवस्वेवचक्रेपुमल्म
नसोर्ल्लयोलययोगइत्युक्तं॥येनाणिमादिपरमैश्वर्यसंपन्नोयोगीत्रिभुवनेराजतेसचनिर्बीजस
माधिरूपोराजयोगइत्युच्यते॥स्कंदपुराणे॥प्राणापानेनशोजीवऊर्ध्वाधःपरिधावति॥वामद
क्षिणमार्गेणचंचलोनस्थितिंलभेत्॥गुणवद्वोपयोपक्षीगतोप्याकृष्यतेपुनः॥गुणैर्वद्धस्त
थानीवःप्राणापानेनकृष्यते॥अपानःकर्षतिप्राणंप्राणोप्यानंचकर्षति॥ऊर्द्धाधः संस्थिता
वेतौसंयोजयतियोगवित्॥हकारेणबहिर्यातिसकारेणविशेत्पुनः॥हंसहंसेत्यमुंमंत्रंजीवोज
पतिसर्वदा॥षट्शतानिदिवारात्रौसहस्त्राण्येकविंशतिः॥एतत्संख्यान्वितंमंत्रंजीवोजपतिस
र्वदा॥अजपानामगायत्रीयोगिनांमोक्षदायिनी॥अस्याःसंकल्पमात्रेणसर्वपापैःप्रमुच्यते॥

अनयासदृशीविद्याअनयासदृशोजपः॥अनयासदृशोज्ञानंनभूतंनभविष्यति॥त्रयोपिराज
योगांगमेव॥हठप्रदीपिकायां॥पीठादिकुंभकाश्चित्रादिव्यानिकरणानिच॥सर्वेल्लयहठाभ्यां
मोराजयोगस्यसिद्धये॥राजयोगंसमारूढःपुरुषःकालवंचकइतिआदिपद्येनषट्कर्मणिग
ल्लंते॥पीठपद्मयमनियमयोरप्युपलक्षणं॥तयोःसर्वयोगशास्त्रेषुयोगांगत्वेनोक्तत्वात्॥अत्र
यद्यपिश्लोकेयमनियमादीनांसर्वेषामेवसाक्षाद्राजयोगोपकारकत्वंप्रतीयतेतथापिपूर्वा
परग्रंथपर्यालोचनयानैवंसिद्धांतः॥यमादीनामष्टांगानांसाक्षात्परंपरयासमाध्युपयोगि
त्वंपूर्वमेवोक्तं॥तत्रषट्कर्ममुद्राणांतुहठांगत्वमेव॥षट्कर्ममुद्राउपरिष्टाद्वक्ष्यंते॥तत्रषट्क
र्मणांश्लेष्मादिदोष निवारकत्वद्वारा॥दोषाभावेतुनास्त्येव॥भूम्यंतुसत्यपिदोषैरनेकपापसं
कृन्नत्वात्षट्कर्मणामनुष्ठानमनिच्छंतःप्राणायामैरेवसर्वकायेसिद्धिरनाहठस्यापिननियतो

गन्त्रमित्याहुः॥तथाचात्मारामः॥षट्कर्मनिर्गतस्थौल्यकफमेहोगदादिकः प्राणायामंततः कु
र्यादनायासेनसिद्ध्यति॥मेदश्लेष्मनिवृत्त्यर्थंषट्कर्माणिसमाचरेत्॥अन्यथानाचरेन्नानिदोषा
णांसमनायतःप्राणायामैरेवंप्रशुष्यंतिमलाइतिकेषांचिदाचार्याणामन्यकर्मनसंमतमिति
॥मुद्राणांनुमूलबंधलेजोधरोद्विया नमहामुद्रामहाबंधमहाबंधशक्तिचालनंतासाक्षादे नो
वहठोपकारकत्वंविपरीतरवेच यौस्तःशरीरसिद्धिद्वारेविवेकः॥वासिष्ठेनुरवेचर्यामपिसा
क्षादेवोपयोगित्वमुक्तंतथाहितालुमूलगतांयत्नाज्जिह्वयाक्रम्यघंटिकां॥ऊर्द्धरंध्रगतेप्राणे
प्राणस्पंदोनिरुध्यतइति॥मानसोल्लासे॥आकुंचनंमपानस्यप्राणस्यचनिरोधनं॥लंबि
कोपरिजिह्वायाः स्थापनंयोगसाधनमिति॥नंदिकेश्वरतारावल्यां उड्डीयंजालंधरमूलबं ण
धैरुन्निद्रतायांमुरगांगनायां॥प्रत्यग्बिमुंचन्प्रविशन्सुषुम्णांगमागमौमुंचतिगंधवाहइति ह ९

ठप्रदीपिकायां॥विविधैरासनैःकुंभैर्विचित्रकरणैरपि॥प्रबुद्धायामादिशक्तौप्राणःशून्येविलीयते
॥उत्पन्नशक्तिबोधस्यत्यक्तनिःशेषकर्मणःयोगिनःसहजावस्थास्वयमेवप्रजायते॥सुषुम्णावा
हिनीप्राणेशून्येविशतिमारुते॥तदासमस्तकर्माणिनिर्मूलयतियोगवित्॥वासिष्ठे॥गुरादिस्थान
संकोचात्स्थानकादिक्रियात्रमेःभोजनासनशुद्धाचसाधुशास्त्रार्थभावनात्॥आचारमृजनासं
गात्सर्वत्यागात्सुवासनात्॥प्राणायामक्रमाभ्यासाद्रामकालेनकेनचित्॥कामलोभपरिसा
गाद्योगत्यागाच्चसुव्रत॥त्यागात्तानिरोधेषुभ्रंशंयांतिविधेयतां॥प्राणःप्रभुत्वात्तज्ज्ञःपुं
सोभ्रत्याइवारिवलारइति॥ननुमुद्राहठयोगादीनांबहुफलत्वश्रवणात्प्राधान्येकिंनस्यादिति चे
न्न॥तत्स्यार्थवादकत्वात्॥तथाचपूर्वमीमांसायां॥त्र्यंगेषुफलश्रुतिरर्थवादःफलवत्संनिधावप
लंतदंगमिति॥कर्मयोगस्त्वीश्वरार्पणमेवतद्धियोगांगभूतनियममध्येगणितमस्तिसर्वयोगशास्त्रे

षु॥तथाचपातंजलसूत्रद्वयं॥तपःस्वाध्यायेश्वरप्रणिधानानिक्रियायोगः॥शौचस्वाध्यायेश्वरप्रणि
धानानिनियमाश्चेतितपः॥कृछ्रचंद्रायणादिस्वाध्यायःप्रणवादिजपः॥प्रणिधानंपरमेश्वरेफलनिर
पेक्षतयासर्वकर्मार्पणं॥एतेक्रियायोगाइत्युच्यंते॥एतदनुष्ठानेनसमाधिर्भवति॥तत्रक्रियायोगस्प
समाध्युपकारकत्वेद्वारमाहपातंजलिः॥समाधिभावनार्थःक्लेशतनूकरणार्थश्चेति॥क्लेशाअविद्यास्मि
तारागद्वेषाभिनिवेशाः॥तत्राऽविद्याऽतस्मिंस्तद्बुद्धिरूपाभ्रांतिरनित्याशुचिदुः खानात्मसुनित्यशुचि
सुखात्मख्यातिरूपास्मितादीनांचतुर्णांक्लेशानांप्रसवभूमिः॥अस्मितासत्वपुरुषयोरैक्यविषयोभ्र
मो वृत्तिविशेषोहंकारः॥रागःसुखमेवमेसदास्त्वीछारूपःद्वेषोदुःखेहेतुषुनिंदा॥अभिनिवेशोदुराग्र
हः॥एतेषांपंचानांदुःखजनकत्वेनक्लेशशब्दवाच्यानांसंसाराख्यमहानर्थानुकूलानांसमाधि
प्रतिबंधकानांमूलभूतपापनिरासेनशिथिलीकरणद्वारेणसमाधिहेतुत्वंक्रियायोगस्येति॥किंच १०

येस्थूलाभारवत्कार्य्याक्लेशास्तेचित्तैकाग्र्यानूपेणध्यानेननिवर्त्तंते॥सूक्ष्मावासनास्वरूपे
णस्थिताःप्रतिलोमपरिणामेननिवर्तंते॥तथाचसूत्रद्वयं॥ध्यानहेयास्तद्वृत्तयइति॥तेप्रतिप्र
सवहेयाःसूक्ष्माः॥एतेक्लेशाअविद्यामूलाएषांचफलंशुभाशुभलक्षणं॥कर्मणश्चोक्तरूप
स्यफलंसुखदुःखानुभवःकर्मानुरूपजात्यायुर्विषयैर्द्वियप्राप्तिश्चतन्नद्वारासतिमूलेतद्विपाका
जात्यायुर्भोगास्त्रयत्रजात्यायुषोरपिकर्मफलत्वंभोगेजनमितत्वेद्वारत्वेन॥सुखमपिपरिणा
मविरंसत्वादिदर्शनाद्विवेकिनंप्रतिदुःखमेवेतिमंतव्यं॥एतेक्लेशाःशुभाशुभकर्मवासनास्वकर्
माशयजात्यायुर्भोगास्त्रविपाकफलाअविद्यामूलाविवेकिनात्याज्याएवतत्यागश्चमूलभूताविद्या
छेदकसम्यक्ज्ञानसाध्यःसम्यक्ज्ञानंचशास्त्रसाध्यंशास्त्रंचेदंहेयतत्कारणास्त्यपर्वचनुष्ट
यजुष्टनयाचतुर्व्यूहं॥तद्यथादुःखबहुलःसंसारोहेयःप्रधानपुरुषसंयोगोहेतुस्तस्यापिहेतुरविद्याप्र

धानपुरुषसंयोगात्यंतनिवृत्तिर्हानंतदेववचैकैवल्यंतत्रहेतुर्विवेकख्यातिरितितथाचसूत्राणिहेयंदुःख
मनागतंदृग्दृश्ययोःसंयोगोहेयहेतुःतस्यहेतुरविद्या॥तदभावात्संयोगाभावोहानं॥तद्दृशेःकैवल्यं
विवेकख्यातिरविप्लवाहानोपायइत्यादीनि॥द्रष्टृदृश्यतत्संयोगपराण्यपिचसूत्राणिद्रष्टादृशिमा
त्रशुद्धोऽपिप्रत्यानुपश्यःप्रकाशक्रियास्थितिशीलंभूतेंद्रियात्मकंभोगापवर्गार्थंदृश्यं॥स्वस्वामि[illegible]व
रूपोपलब्धिहेतुःसंयोगइति॥एतदर्थंस्वकचित्स्वरूपोपरिणामोसंनिधानमात्रेणविषयोपरक्त
तिनियमरूपसत्वरजस्तमोगुणात्मकंग्राह्यरूपस्थित्यादितन्मात्राद्यविशेषणस्थूलसूक्ष्मपरि
णामकंबुद्धींद्रियकर्मेंद्रियांतःकरणत्रैधेंद्रियपरिणामभोगापवर्गप्रयोजकंधर्म्यदृश्यं॥स्वस्व
क्तिस्वामिशक्तिशक्तिमतोर्दृश्यद्रष्टृस्वरूपयोर्नित्ययोर्व्यापकयोरसंवेद्य पर्वणिस्थितयोर्यत्स्व
रूपोपलब्धिहेतुःससंयोगोनादिर्भोक्तृत्वस्वभावः सएवद्रष्टृदृश्यसंयोगइति॥अत्रेदमालोचनी

यं॥द्रष्टादृशिमात्रइत्यत्रमात्रपदंनैयायिकाभिमतधर्मधर्मिभावनिराकरणपरं॥नत्वानंद
स्वरूपत्वनिवारकं॥यथाचैतन्यमात्रपरमार्थीनिजस्वभावमितिसर्वज्ञात्ममुनिभिरुक्तंमा या
त्रपदं॥तदेतत्प्रेयःपुत्रादितिश्रुतेर्नित्युपाधिप्रेमास्पदत्वेनलिंगेनसुखमहमस्वाप्समित्यनु
भवेनस्वात्मन आनंदरूपत्वस्यसिद्धत्वात्॥अतएवाशरीरंवावसंतंप्रियाप्रियेनस्पृशतइति
श्रुतिर्वैषयिकसुखदुःखनिषेधपराऽन्यथाएतस्यैवानंदस्यान्यानिभूतानिमात्रामुपजी
वंतीतियोवैभूमातत्सुखमितिकोन्यात्कःप्राण्याद्येषआकाश आनंदोनस्यात्इति॥[illegible]
[illegible]। एषह्येवानंदयातीति॥आनंदंब्रह्मणोविद्वानितिविज्ञानमानंदंब्र
ह्मेत्याद्यनंतश्रुतिविरोधःस्यात्। नचैवंब्रह्मणआनंदत्वबोधनपरानजीवस्यैतियाच्यंतत्स्म

सिद्धयमात्माब्रह्मयत्साक्षादपरोक्षाद्ब्रह्मयआत्मासर्वान्तरइत्यादिश्रुतिभिर्जीवब्रह्मणोरैक्यबोध
नात्तत्रात्मात्रपदमानंदरूपताव्यवच्छेदकंकिंतुधर्मधर्मि भावव्यवच्छेदकमित्येवयुक्तं॥विवेक
ख्यातिरविप्लवाहानोपायइतिसूत्रस्यायमर्थः अन्येगुणाःअन्यःपुरुषइत्येवंविधस्यविवेक
ख्यातिः प्रज्ञासाहानसदृश्यपरित्यागस्योपायः आगमानुमानाभ्यांजनितविवेकख्या
तिरूपंसोप्युत्थाननत्वं स्वारानुवृत्तेर्नास्याउपायत्वमित्येतदुक्तंभवतिमिथ्याज्ञान
रहितस्येत्यर्थः एतदुक्तंभवतिश्रुतिमयेनज्ञानेनविवेकंगृहीत्वायुक्तिमयेनव्यवस्याप्यदी
र्घकालनैरंतर्यसत्कारसेवितयाभावनयाप्रकर्षयर्यंतंप्रधिगतसाक्षात्कारवतीविवेक
ख्यातिर्निवर्तितसवासनमिथ्याज्ञानाविप्लवाहानोपायइतिवाचस्पतिमिश्राः भोजदे
वस्यारव्यानंतुनविद्यतेविप्लवोविच्छेदोव्युत्थानरूपोयस्याअ न्येगुणाअन्यःपुरुषइतिप्रति

१२

पक्षभावनाबलादविद्यातिलयेनिवृत्तेस्तत्त्वकर्तृत्वाभिमानायारजस्तमोमलानभिभूतापु
द्धेरंतर्मुखायाचित्शक्तिस्साविवेकख्यातिरित्युच्यतेतस्यांसंततत्वेनप्रज्ञायांस्वस्या
धिकारनिवृत्तेर्भवतिकैवल्यमिति॥इदमत्रालोचनीयं॥प्रकृतिपुरुषविवेकधीमात्रंमहानसा
धनीभूतविवेकख्यातिस्वरूपंकिंतुविवेकख्यातिःप्रथमभूमिः एतदनंतरंतुरजस्तमोले
शहीनेनिर्मलेसत्वप्रकाशेंतःकरणेयाहृत्तिसारूप्यलक्षणानदाद्दृष्टःस्वरूपेवस्थानमितिसू
त्राभिहितापूर्णचैत न्यैकरसब्रह्मप्रतिभासलक्षणाहंब्रह्मास्मीत्येवंरूपासैवसर्वात्मना
स्वरूपब्रह्मस्वरूपप्राप्तिलक्षणस्यकैवल्यस्यहानशब्दाभिधेयस्यपरमउपायइति॥अन्येगुणाअ
न्यःपुरुषइतिज्ञानमितिविवेकख्यातिन्यायेनाख्यानंत्वनादिप्रवृत्तसकलानर्थमूलभूतजडदेहाद्यभि
माननिवृत्त्यसाधारणकारणत्वेनजडाजडविवेकमात्रोपयोगितयाऽनएवास्मिन्नेवमोक्षो

पिहानकैवल्यादिशब्देरेवोक्तः॥ यत्तुमोक्षदशायांप्रकाशमानंनिजात्मस्वरूपंयत्तन्मोक्षसा
धनस्यासाधारणविषयावच्छिन्नंस्वरूपंतत्साक्षाच्छ्रुतैवब्रह्मैक्यमात्मानमितिनप्राधान्येनविशे
षतोव्युत्पादितंभगवतापतंजलिना॥तथाचबृहदारण्ये॥ब्रह्मवाइदमयआसीत्तदात्मा
नमेवावेदहंब्रह्मास्मीतितस्मात्तत्सर्वमभवदितिविद्यासूत्रेसर्वात्मभावरूपमोक्षमुद्दिश्यत्त
त्साधनतेनाहंब्रह्मास्मीतिज्ञानंसाधनमित्युपक्रांतमुपसंहरति॥तद्दृष्ट्यैतदृष्ट्यैवंवेद
दाहंब्रह्मास्मीतिसइदंसर्वंभवतीतितथान्यथाज्ञानमविधत्यनदपिप्रदर्शितंतत्रैवावि
द्यासूत्रेऽन्यथोन्यासावन्योऽमितिनसवेदेत्यादितत्पलमतिप्रसंगेन॥एतदुक्तंभवतिकाम्यनि
षिद्धवर्जितेश्वरार्थकृतसर्वकर्मभिर्निर्गतांतनिर्मलस्वांतस्यविषयदो' दोषदर्शनसंजातवैराग्य
स्यनरतिशोकमात्मविदितिश्रुतिवाक्यावगतसमूलसर्वदुःखोच्छेदकात्मज्ञानार्थितयासद्गुरू

पसत्याश्रवणमननोपबृंहितनिदर्प्यासनाभ्यासेनप्राप्तनिर्बीजसमाधेःपुंसोबुद्धिशुद्धिद्वारे
वसमाधिरूपकृतकार्याणिकर्माणिस्वतएवनिवर्तंते॥तथाचनैष्कर्म्यसिद्धौ॥प्रत्यक्प्रवणतो
बुद्धेःसंपाद्यशुद्धितः॥कर्माणिविनिवर्तंतेप्राप्तुंतेब्रह्मनाद्वेति॥राजयोगे॥नकर्माणिप्रत्यूह
योगीकर्मभिस्त्यज्यतेह्यसौ॥कर्मणोमूलभूतस्यसंकल्पस्यैवनाशनात्॥यथायथासदाभ्या
मात्संकल्पविलयोभवेत्॥योगिनोभवतिश्रेयान्कर्मत्यागस्तथानया॥उत्तुंगसहजानंदस
दाभ्यासरतःस्वयं॥सर्वसंकल्पसंत्यक्तः सविद्वान्कर्मसंत्यजेत्॥सांसारिकक्रियासक्तब्र
ह्मज्ञोस्मीतिवादिनं॥कर्मब्रह्मोभयभ्रष्टंनत्यजेत्त्यजयाद्रति॥कालिकापुराणे॥धर्मःप्रय
त्नतःकार्योयोगिनात्वविशेषतः॥नास्तिधर्मादृतेयोगादितियोगविदोविदुः॥याज्ञवल्क्यगीतासु॥
गार्ग्यउवाच॥योगयुक्तोनरःस्वामिन्संध्ययोर्वायवानिशिवेधंकर्मकथंकुर्यान्निःक्रांतःका

त्वकुर्वतः॥याज्ञवल्क्य उवाच॥योगयुक्तमनुष्यस्यसंध्ययोर्वायवानिशि॥यत्कर्त्तव्यंवरारोहे
कृतंयोगेनतत्तथेत्॥स्वात्माग्निहोत्रवन्नोचप्राणायामैर्विवर्द्धते॥विशुद्धचित्तहविषावि
शुद्धंकर्मकुर्वतः॥निःकृतिस्तस्यकाबालेकृत्तकृत्यस्तदाभवेत्॥वियोगेसतिसंप्राप्तेजीवात्म
परमात्मनोः॥विधुक्तंकर्मकर्त्तव्यंब्रह्मविद्विश्वनित्यशः॥वियोगकालेयोगीतुदुःखमित्येवन
त्यजेत्॥कर्मणितस्यनिलयोनरकःपरिकीर्त्तितः॥नयोगिनायतःशक्यंत्यक्तुंकर्माण्यशेषतः॥
तस्मादामरणाद्धैर्यंकर्त्तव्ययोगिनासदा॥भगवद्गीतायां॥आरुरुक्षोर्मुनेर्योगंकर्मकारणमु
च्यतेयोगारूढस्यतस्यैवशमःकारणमुच्यते॥कूर्मपुराणे॥तस्मात्सर्वप्रयत्नेनवर्णाश्र
मविभौस्थितः॥समाश्रितोनिमंभावंमायाशक्तिंतरेद्बुधः॥स्वधर्मपरमोनित्यमीश्वरार्पितमा
नसः॥प्राप्नोतिपरमंस्थानंयदुक्तंवेदवादिभिः॥ब्राह्मणक्षत्रियविशांस्त्रीशूद्राणांचसत्तमाः॥

१५

स्वजातिविहितंकर्मरागद्वेषविवर्जितं॥ज्ञानकारणभावंहितदेवमतिपद्यतइति॥योगबीजे॥न
कर्मणाविनादेविमोक्षसिद्धिःप्रजायते॥ज्ञानंवास्वर्गभोगोवापुण्यहीनैर्नलभ्यते॥तस्मात्कार्यंन
देवाशुभस्यास्तिहिंसाधनं॥तेनैवप्राप्यतेसिद्धिर्न्नान्यथाशिवभाषितमिति॥किंचेश्व
राधनमेवयोगस्यमुख्योपायोस्ति॥तथाचयाज्ञवल्क्येयोगोपायनिरूपणे॥ईश्वरप्रणिधा
नाद्वेति॥वाशब्दोनएवकारार्थःकायिकवाचिकमानसभक्तिविशेषेणाराधितस्येश्वरस्यप्र
सादादेवयोगोयोगफलंचभवतीतिसूत्रार्थः॥वेदांतेव्याससूत्रं॥फलमतउपपत्तेरिति॥अने
नभक्तियोगस्यापिराजयोगांगत्वंवेदितव्यं॥वैराग्ययोगस्यापिराजयोगांगत्वेनपतंजलि
नोक्तत्वान्नमुख्ययोगत्वं॥तथाहि॥अभ्यासवैराग्याभ्यांतन्निरोधइति॥अस्यार्थःवृत्तिमा
णाभ्यासवैराग्याभ्यांप्रकाशप्रवृत्तिनियमरूपाणांचित्तवृत्तीनांयत्प्रतिहननंसनिरोधः॥

चित्तवृत्तीनांनिरुद्धत्वाद्भावाभिनिवेशानामंतर्मुखत्वयास्वकारणेचित्तेशक्तिरूपतयावस्थानं ॥अत्र विषयदोषदर्शनजेनवैराग्येणतद्वैमुख्यमुत्पाद्यते॥अभ्यासेनचसुखजनकशांतप्रवाहप्रदर्शनद्वारेण दृढंस्थैर्यमुत्पाद्यते॥अतस्तौभवतिचित्तवृत्तिनिरोधारव्यसमाधिः॥अभ्यासस्यसामान्यविशेषलक्षणमाहसूत्राभ्यां॥तत्रस्थितौयत्नोभ्यासः॥सतुदीर्घकालनैरंतर्यसेवितोदृढभूमिरिति॥अस्यार्थःवृत्तिरहितस्यचित्तस्वरूपनिष्ठःपरिणामःस्थितिस्तस्यां प्र यत्नउत्साहःपुनः पुनस्तदात्वेनचेतसिनिवेशनमभ्यासइत्युच्यते॥सएवाभ्यासोबहुकालनैरंतर्येणादरातिशयेनचसेव्यमानोदृढभूमिः स्थिरोभवतीत्यर्थः॥स्कंदपुराणे॥आत्मज्ञानेनमुक्तिःस्यात्सचयोगात्तेनहि॥सचयोगश्चिरंकालमभ्यासादेवसिद्ध्यति॥नारण्यसंश्रयायोगोनानाग्रंथविचिंतनात्॥नदानैर्नचवृत्तैर्वापिनतपोभिर्नवामरैः॥नचप्राणासनायोगोनच॥

१५

रा

प्राणाग्रवीक्षणात्॥नशौचेननमौनेननमंत्रौघनैरपि॥अभियोगात्सदाभ्यासात्तत्रैवचविनिश्चयात्॥पुनःपुनरनिर्वेदात्सिद्ध्येद्योगोन्यथान्यथा॥आत्मक्रीड्यस्यसन्ततंतथात्मिथुनस्यच॥आत्मन्येवसुतृप्तस्ययोगसिद्धिर्नदूरतः॥अत्रात्मव्यतिरेकेणद्वितीयंयोनपश्यति॥आत्मारामःसयोगीद्रोब्रह्मीभूतोभवेदिहस्वसंवेद्यंहितब्रह्मकुमारीस्त्रीसुखंयथा॥अयोगीनहितद्वेत्तिजात्यंधइववर्म्मिकां॥नित्याभ्यसनशीलस्यस्वसंवेद्यंहितद्भवेत्॥तत्सूक्ष्मत्वादनिर्देश्यंपरंब्रह्मसनातनमिति॥आगमेपारमेश्वरतंत्रे॥तस्मादभ्यसनंनित्यंकर्त्तव्यंमोक्षकांक्षिभिः॥अभ्यासाज्जायतेसिद्धिरभ्यासान्मोक्षमाप्नुयात्॥संवित्तिर्लभतेभ्यासाद्योगोभ्यासात्प्रवर्त्ततेमंत्राणांसिद्धिरभ्यासादभ्यासाद्दायुसाधनंकालवंचनमभ्यासात्तथामृत्युजयोभवेत्॥वाक्सिद्धिःकामचारत्वंभवेदभ्यासतोध्रुव

मिति॥ हठप्रदीपिकायांयुवाबालोपिवृद्धोवाव्याधितोदुर्बलोपिवा ।।अभ्यासात्सिद्धिमाप्नो
तिसर्वयोगेष्वतंद्रितः॥ अमृतसिद्धौ॥ मुद्राप्राणायामनिरूपणानंतरमुक्तं॥एवंबुधैःसदाभ्या
सःकर्त्तव्योमोक्षकांक्षिभिः॥ अभ्यासाज्जायतेयोगोयोगात्सर्वंप्रसिद्ध्यति॥ अनेनाभ्यासयोगे
नवायुरभ्यसितोभवेत्॥ वायोरभ्यासतोवह्निःप्रत्यहंवर्द्धतेभृशं॥ वह्नौविवर्द्धमानेहिसुष
मन्नंहिपच्यते॥ अन्नस्यपरिपाकेनरसवृद्धिःप्रजायते॥ रसेवृद्धिंगतेनित्यंवर्द्धतेधातवस्त
था॥ धातोःसंवर्द्धनादेवप्रधानोवर्द्धतेरसः॥ प्रधानरससंपन्नो दृढकायोमहाबलः॥ महावं धो
महाभ्यासोबलादेवप्रजायते॥ महावंधान्महाभ्यासाद्व स्यजारणंभवेत्॥ दोषाःसर्वेपि शु
ष्यंतिमलमूत्रकफापकाः॥ दह्यंतेसर्वपापानिजन्मकोटिकृतानिच॥ इहैवाभ्यासयोगेनतृणा
निवह्निनायथा॥ तपांसियानिदिव्यानिअयुक्तान्ययुक्तानिच॥ कोटिकोटिगुणैस्तानिभवं

MEMORIAL

त्यभ्यासयोगतः॥ प्रकृतिश्चगुणादोषाव्याधयोविविधास्तथा॥ शमेनैत्यभ्यासयोगनखंमद्या
वायुनायथेति॥ तथा वैराग्यसामान्यविशेषलक्षणपरंसूत्रद्वयं॥ दृष्टानुश्रविकविषयवित्त
ष्णस्यवशीकारसंज्ञावैराग्यंतत्परंपुरुषख्यातेर्गुणवैतृष्ण्यमिति॥ एतदर्थंस्तुदृष्टोविषयइ ष्ण
हैवोपलभ्यमानःशब्दादिःआनुश्रविकोविषयोदेवलोकादौ अनुश्रूयतेगुरुसुखादित्यनुश्रवो
वेदस्तंतआगमश्चानुश्रविकस्तयोर्द्वयोर्विषययोरपिपरिणामविरसत्वदर्शनेनविगतस्पृ
हस्यया वशीकारसंज्ञामैवैनेवश्यानाहमेतेवश्यानाहमेतेपांवश्यइतियोयंवि
मर्षस्तद्वैराग्यमुच्यते॥ प्रथमंवैराग्यंविषयविषयंद्वितीयंगुणविषयं॥ तत्रगुणविषयंव
राग्यंपरमुच्यते॥ उत्पन्नगुणपुरुषविवेकख्यातेरेवतद्वैराग्यंभवतिनिरोधसमाधिर
स्यैतानुकूल्यत्वात्॥ अनेनविवेकख्यातिर्वाच्यासांख्ययोगस्यापियोगाप्ययोगित्वमुक्तं॥ए

वंचाद्वितीयेवस्तुनिवेदांतवाक्यतात्पर्यावधारणात्मकस्यश्रवणस्यश्रुतार्थस्ययुक्तिभिश्चिंतना
त्मकस्यमननस्यचनियमेविजातीयप्रत्य यतिरस्कारेणसजातीयप्रत्ययवाहीकरणात्मकनि
द ध्यासनस्यध्यानेसंप्रज्ञातसमाधौचांतर्भावोद्रष्टव्यः॥तथाचयोगे वल्क्यनियमविवरणे॥
सिद्धांतश्रवणंप्रोक्तंवेदांतश्रवणंबुधैः॥वेदांतश्रवणं कुर्वन्योगंतस्मिन्समभ्यसेत्इति॥न
स्माद्दृष्टांगयोगाद्वहिर्भूतंकिमपियोगशब्दवाच्यमस्तीत्यवधेयं॥ननुवाशिष्ठेसंसारोत्तरणे
युक्तियोगशब्देनकथ्यते॥आत्मज्ञानप्रकारश्चप्राणानांसंयमस्तथा॥प्रकारोद्वावपिप्रोक्तो
योगशब्देनयद्यपि॥तथापिरूढिमायातःप्राणयुक्तावसौभृशमितिउक्तत्वात्कथंमनोनिरो
धएवयोगइतिचेत्॥सत्यंमनोनिरोधस्यप्राणनिरोधात्मकत्वाशयेनोक्तत्वात्॥अतएवप्रा
णायामएवाभ्यासक्रमेणप्रत्याहारधारणाध्यानसमाधिशब्देनोच्यते॥तथाचदत्तात्रेयः॥ १७

प्राणानामुपसंरोधात्प्राणायामइतिस्मृतः॥शब्दादिभ्यःप्रवृत्तानियतक्षानियतात्मभिः॥
प्रत्याहृियंतेयोगेनप्रत्याहारस्ततस्मृतः॥धारणेत्युच्यतेसेयंधार्यतेयन्मनीषिणा॥प्राण
यामादिशब्दोच्चधारणापरिकीर्तिता॥द्वेधारणेस्मृतेयोगेयोगिभिस्तत्त्वदर्शिभिः॥स्कंदपु
राणे॥प्राणायामद्विषट्केनप्रत्याहारउदाहृतः॥प्रत्याहारैर्द्वादशभिर्द्धारणापरिकीर्तिता॥म
वेदेश्वरसंगत्येध्यानंद्वादशधारणं॥ध्यानद्वादशकेनैवसमाधिरभिधीयते॥समाधेःपर
तोज्योतिरनंतंस्वप्रकाशकं॥तस्मिन्दृष्टेक्रियाकांडेयातायातंनिवर्त्तनेइति॥तथाधार
णादिपरिमाणंचोक्तं॥धारणापंचनाडिभिर्ध्यानंस्याद्घटनादिकं॥दिनद्वादशकेनस्या
त्समाधिःप्राणसंयमादिति॥त्रुटिकामानमाहवसिष्ठः॥षष्टिश्वासोभवेत्प्राणःषट्प्रा
णाःत्रुटिकाभवेत्॥त्रुटिकाःपंचराशिःस्याद्राशिद्वादशकंदिनमिति॥एवंचद्वादशांशंसा

र्द्ध प्राणद्वयं तावत्कालं धृतो वायुः प्रत्याहार इत्युच्यते ॥ तथा सार्द्ध प्राण द्वयस्य द्वाशीदे
शः सार्द्ध द्वादशश्वासात्तावत्कालं धृतो वायुः प्रथमः प्राणायामो भवति ॥ चतुर्विंशति श्वा
सांतो मध्यमः षट्त्रिंशच्छ्वासांत उत्तम इति सिद्धांतः स्कंदपुराणे ॥ एकश्वासमयी मात्रा प्रा
णायामेन निरूच्यत इति निद्रावशंगतस्य पुंसो यावत्तावत्कालेनैव श्वासो गच्छं गच्छंतीत्या
चतावान्कालः प्राणायामस्य मात्रेत्युच्यते विस्तरेण मात्रालक्षणमुपरिष्टाद्वक्ष्यते ॥ किं
चमनः प्राण योः स्पंदोप्येक एवास्ति ॥ वासिष्ठे यः प्राणस्पंदश्चित्तस्पंदः स एव हि ॥
प्राणस्पंदजये यत्नः कर्त्तव्यो धीमतोन्वहं इति ॥ अतएवोभय प्रलयात्मक एकसमाधिः
सर्वयोगशास्त्रेषु प्रसिद्धः स्कंदपुराणे ॥ मदासंक्षीयते प्राणो मानसंप्रेक्षीयते ॥ तदास
मरसत्वं यत्तत्समाधिरिहोच्यत इति ॥ अतएवोभयनाशसत्येवज्ञानमोक्षश्च भवतीति शिव १८
ने

वाक्यं ॥ ज्ञानेकुतोमनसिजीवतिदेवितावत्प्राणोपिजीवतिमनोम्रियतेनयावत् ॥ प्राणोम
नोद्वयमिदंविलयंनयेद्योमोक्षंसगच्छतिनरोनकथंचिदन्यः वासिष्ठे ॥ एकतत्त्वदृढाभ्यासः
प्राणानांविलयस्तथा ॥ मनोविनिग्रहश्चेतिमोक्षशब्दार्थसंग्रहइति ॥ ननुअस्मत्संसारणेगस
र्वोपद्रवकारिणउपायएकएवास्तिमनसःस्वस्यनिग्रहःचित्तमेवहिसंसारःकामक्रोधादि
मिर्युतमित्यादिसंपूर्णे वासिष्ठे ॥ मनएवमनुष्याणांकारणंबंधमोक्षयोः ॥ बंधायविषयास
क्तंमुक्तेर्निर्विषयंमनइत्यादिशास्त्रांतरेषपिसंसारस्यमनोमूलकत्वश्रवणात् ॥ तत्त्वज्ञानमो
क्षयोरपिमनोजयाधीनत्वश्रवणाच्चसर्वानर्थहेतुसविलासाविद्योन्मूलनपूर्वकमोक्षरूपपु
मर्थस्यमनोनिग्रहेणैवसंभवात्किंदुःसाध्यनोवयोगव्याधिदुःखदेनप्राणनिग्रहेणेतिचे
त् ॥ नप्राणजयंविनाचित्तजयस्यासाध्यत्वात् ॥ तथाचस्कंदपुराणे ॥ चलेवातेचलंचित्तंनिश्चलेतु निश्चले

था॥योगीस्थाणुत्वमाप्नोतिनतोवायुंनिरोधयेत्॥क्षणमप्येकमुदकंयथानस्थिरतामियात्॥वा
तादृतंतथाचित्तंतस्मात्तस्मिन्नविश्वसेत्॥अतोऽनिलंनिरुंधीतचित्तस्यस्थैर्यहेतवे॥म रु
न्निरोधनार्थाय षडंगंयोगमभ्यसेत्॥यावद्देहेमरुद्वत्तावच्चितंनिरामयं॥यावद्दृष्टिर्भ्रुवोर्म
ध्येतावत्कालभयंकुतइति॥मार्कण्डेयपुराणे॥इतितेकथितंभूपयोगंचेमंनिबोधमे॥यंप्राप्य
ब्राह्मणोयोगीशाश्वतान्नाम्यतोव्रजेत्॥प्रागेवात्मात्मनाजेयोयोगिनासतिदुर्जये॥कुर्वीतत
ज्जयेयत्नंतस्योपायंशृणुष्वमे॥यथापर्वतधातूनंमलादह्यंतिध्मातां॥तथेंद्रियकृतादो
षादह्यंतेप्राणनिग्रहात्॥प्राणायामैर्दहेद्दोषांधारणाभिश्चकिल्बिषं॥प्रत्याहारेणसंसर्गा न्
ध्यानेनानीश्वरोगुणान्हरति॥हृदग्रदीपिकायांविविधैःप्राणसंयामैर्नाडीचक्रेविशोधिते
॥सुषुम्णावदनंभित्वासुखाद्विशतुमारुतः॥मारुतेमध्यसंचारेमनःस्थैर्यंप्रजायते॥योग १८

तःसुस्थिरीभावःसैवावस्थामनोन्मनीति॥वासिष्ठे।योगिनश्चित्तशांत्यर्थंकुर्वंतिप्राणनिग्रहं॥
प्राणायामैस्तथाध्यानैःप्रयोगैर्युक्तिकल्पितैः॥चित्तोपशांतिफलदंपरमंशांतिकारणं॥सुम
गंसंविदःस्वास्थ्यंप्राणसंरोधनेविदुः॥द्वेबीजेचित्तवृत्तस्यप्रवृत्तिर्वृत्तधारिणः॥एकंप्राणपरि
स्पंदोद्वितीयंदृढवासना॥चित्तंप्राणपरिस्पंदमंगरागमभूषणाःतस्मिन्संरोधितेनूनमुपशां
तंभवेन्मनः॥मनःस्पंदोपशांत्यायसंसारःप्रविलीयते॥सूर्यालोकपरिस्पंदशांतौव्यवहृति
र्यथा॥अभ्यासेनपरिस्पंदेप्राणानांक्षयमागते॥मनःप्रशममायातिनिर्वाणमवशिष्य
तइति॥शास्त्रांतरे।प्राणायामैर्विनायोगंसाधयेद्यस्तुमंदधीः॥नस सिद्धिमवाप्नोति
जिगतिर्यथेति॥योगबीजे॥चित्तंप्राणेनसंबद्धंसचजीवेषुसंस्थितः॥ज्ञात्वाबद्धंतमात्मानं द्वाद
शस्थद्वादशंमनः॥नानाविधैर्विचारैस्तुनसाध्यं जायतेमनः॥तस्मात्तस्यजयोपायःप्राण

स्यजयएवहि॥तर्कैर्नर्त्यैःशास्त्रजालैर्युक्तिभिर्मंत्रभेषजैः॥नवशोजायतेप्राणःसिद्धोपा
यंविनाप्रिये॥उपायंतमविज्ञाययोगमार्गंप्रवर्त्तते॥खंडज्ञानेनतेनैवजायतेक्लेशभाग्नरः॥यो
ऽजित्वापवनंमोहाद्योगमिच्छतियोगिकः॥सोऽपक्वंकुंभमारुह्यसागरंतर्तुमिच्छतियस्यप्राणाः
प्रविलीनाःसाधकेजीवितेसति॥पिंडोनपतितस्तस्यचित्तदोषैःप्रमुच्यते॥शुद्धेचेत्तसित
स्यैवस्वात्मज्ञानंप्रकाशते॥तस्मात्तस्मात्ज्ञानंप्रकाशते॥तस्माज्ज्ञानंभवेद्योगाज्ज्ञानेनेवनया
र्वृत्ति॥तस्माद्योगंतमेवादौसाधकोनित्यमभ्यसेत्॥मुमुक्षुभिःप्राणजयःकर्त्तव्योमोक्ष
हेतवइति॥पतंजलिसूत्रंच॥प्रच्छर्दनविधारणाभ्यांप्राणस्येति॥चित्तनिरोधःस्यादित्यर्थः
॥एवंमनोजयेसत्येवप्राणजयोभवतितयोः॥सव्यापारेपरस्परसापेक्षत्वात्॥तयाचवा
सिष्ठेअविनाभाविनीनित्यंजंतूनांप्राणचेतसीकुसुमामोदवन्मिश्रेतिलतैलेद्रवस्थिते॥आ

२०

धाराधेयवद्वैतेएकाभावेविनश्यतःकुरुतश्चविनाशेनकार्यमोक्षाख्यमुत्तमं॥राजयोगे॥दुग्धांबुवत्सं
मिलितौसहैतुल्यक्रियौमानसमारुतौच॥यावन्मनस्तत्रमरुत्प्रवृत्तिर्यावन्मरुन्मनःप्रवृत्तिः॥न त्र
त्रैकनाशादपरस्यनाशएकप्रवृत्तावपरप्रवृत्तिः॥अध्वस्तयोःस्वेंद्रियवर्गवृत्तिर्विध्वस्तयोर्मोक्षप चित्त
दस्यवृद्धिः॥तत्रापिसाध्यपवनस्यनाशःषडंगयोगादिनिषेवणेन॥मनोविनाशस्तुगुरुप्रसादान्नि
षेवमाणेन सुसाध्यएव॥यथायथासदभ्यासान्मनसःस्थिरताभवेत्॥वायुकायदृष्टी
प्रयत्नो नांतुस्थिरताहितथातथा॥तस्मान्मनोनाशविधौयत्नाशतोनश्यतिवायुरुग्रः॥तस्मात्स्वदे
हेंद्रियबुद्धिनाशाद्द्वैतबुद्धिःसहजस्थितेवेति॥सुरेश्वराचार्यैः॥चित्तेनिश्चलतांयातेप्राणा
भवतिनिश्चलः॥चित्तस्यनिश्चलत्वंयोगमष्टांगमभ्यसेदिति॥हठप्रदीपिकायां॥मनःस्थैर्यंस्थि
रोवायुस्ततोबिंदुःस्थिरोभवेत्॥बिंदुस्थैर्यात्सदाभ्यासात्पिंडस्थैर्यंप्रजायतइति॥अमनस्कसिद्धौ॥मर

णंविंदुपातेनजीवनंविंदुधारणात्॥विंदौमहारसेसिद्धेसर्वसिद्धिःप्रजायते॥विंदुर्वेधाविंदुर्विष्णु
र्विंदुरेवःसदाशिवःविंदुःसर्वगतोदेवोविंदुस्त्रैलोक्यदर्पणः॥सर्वतत्वाधियोदेवभवरूपोनिरञ्ज
नः॥अयंचविंदुरूपेणवसतेसर्वजंतुषु॥सविंदुर्द्विविधोज्ञेयःपौरुषोऽवनिसंभवः॥वीजंचयोस्य
प्रोक्तंरजश्चस्त्रीसमुद्भवं॥अनयोर्वास्वयोगेनसृष्टिःसंजायतेनृणां॥यदाभ्यंतरतोयोगस्तदा
योगीनिगीयतेविंदुःसूर्यमयःप्रोक्तोरजश्चंद्रमयंतथाअनयोः संगमादेवजायतेपरमंपदं॥
स्वर्गदोमोक्षदोविंदुर्द्धर्मदोधर्मदस्तथा॥तन्मध्येदेवताःसर्वास्तिष्ठंतेसूक्ष्मरूपतः॥दृंतत्व
मिदंवीजंसर्वसारोयमुच्यते॥वायुनापततेविंदुर्नचान्यैर्विंदुसाधनं॥यामवस्थांव्रजेद्वायुर्वि
दुस्तामवगछतिययाहिसाध्यतेवायुस्तथाविंदुप्रसाधनं॥मूर्छितोहरतेव्याधिंवंद्धःखेचरतांनयेत्॥सर्वसिद्धिकरोलीनोनिश्चलोमुक्तिदायकः॥यथावस्थाभवेद्वायोश्चित्तावस्थातथा

MEMORIAL

तथा॥चलत्येषयदावायुस्तदाविंदुश्चलःस्मृतःविंदुश्चलतियस्यांगेचित्तंतस्यैवचंचलं॥चलेविंदौ
चलेचित्तेचलत्वंवायोश्चसर्वदा॥जायतेलोकःसत्यंसत्यमिदंवचःयावैमादःसर्वविंदुस्तद्विचिंतौ॥
यदासौम्रियतेवायुर्मध्यमामध्ययोगतः॥तदाविंदुश्चचित्तंचम्रियतेवायुनासह॥सर्वा॥
णिविंदुतत्वानिशरीरेनिवसंतिच॥चरंतिवायुसंचारेम्रियंतेवायुमारणादिति॥वासिष्ठो॥रा
मउवाच॥अनिशंचरतांदेहगेहेगहनगामिनां॥प्राणादीनांपरिस्पंदोवायूनांरोध्यतेकथं
॥वसिष्ठउवाच॥शास्त्रसज्जनसंपर्कैर्वैराग्याभ्यासयोगतः॥अनास्थायांकृतास्थायांपूर्व
संसारवृत्तिषु॥यथाभिवांछितध्यानाच्चिरमेकत्रयोदितात्॥एकतत्वघनाभ्यासात्प्राण
स्पंदोनिरुध्यते॥पूरकांतनिलायामाद्यभ्यासाद्रेचकाद्यतः॥एकांतध्यानसंयोगात्प्राण
स्पंदोनिरुध्यते॥ॐकारोच्चारणप्रांतशाश्वतत्वानुभावनात्॥अवासनमनोध्यानात्प्राण

७ प्रकीर्तितं॥नाडी ... तथाकारसंकीर्तनात्॥तथाकारसंकीर्तनात्॥ प्र

स्पंदोनिरुध्यते॥द्वादशांगुलपर्यंतेनासाग्रेविमलेंबरे॥संविदशोःप्रशाम्यंत्योःप्राणस्पंदोनि-
रुध्यते॥प्राणायामैर्दशाभ्यासैर्युक्त्या गुरुदत्तया॥आसनाशनयोगेनप्राणस्पंदोनिरुध्यते॥
अभ्यासेननिराबाधमेतास्तायोगयुक्तयः॥उपायतामुपायं निभव्यस्यभवभेदने॥अभ्या-
सादृढतांयातेवैराग्यपरिलांछितः॥यथावासनमायामःप्राणानांसफलाःस्मृतः य
तोवाचोनिवर्तंतेविकल्पकलनान्विताःविकल्पसंक्षयाज्जंतोःमदंतरवशिष्यनदृति॥
संत्यन्येपिप्राणजयोपायाविस्तरभयान्नलिख्यंते॥तस्माद्धठराजयोगोसमुच्चितावेवाभ्य
सनीयौ॥हठप्रदीपिकायां॥हठंविनाराजयोगोराजयोगंविनाद्वयोर्वासिद्धिः॥यावद्वि
लीनंनमनोनतावद्वासनाक्षयःतक्षीणावासनायावत्तावच्चित्तंनशाम्यति॥नयावत्तत्वविं
ज्ञानंतनतावच्चित्तसंक्षयः॥यावन्नचित्तोपशमोनतावत्तत्ववेदनं॥यावन्नवासनानाशस्तावत्

तत्त्वागमःकुतःयावन्नतत्वसंप्राप्तिर्न्नतावद्वासनाक्षयः॥तत्वज्ञानंमनोनाशोवासनाक्षय
एवच॥मिथःकारणतांगत्वादुःसाध्यानिस्थितान्यतः॥तस्माद्वावयत्नेनपौरुषेणवि
वेकनः॥भोगास्त्यादृत्तःकृत्वात्रयमेनत्समाश्रयेत्॥त्रयएतेसमंयावन्नस्वभ्यस्तामु
हुर्मुहुःनावन्नतत्वसंप्राप्तिर्भवत्यपिसमांशतैःवासनाक्षयविज्ञानंमनोनाशोमहामते॥
समकालंसमभ्यस्ताभवंतिफलदामुने॥एकैकशोनिषेव्यंतेयद्येतेचिरमप्यलं॥तन्नसिद्धि
प्रयच्छंतिमंत्राःसंकीर्त्तिताइव॥त्रिभिरेतैश्चिराभ्यस्तैर्हृदयग्रंथयोदृढाःनिःशंकमेवन्नुद्य
तिविशद्धेदाद्रुणाइव॥जन्मांतरशताभ्य स्ताराग्रसंसारसंस्थितिःसाचिराभ्यासयोगेर
नविनाक्षीयतेक्वचित्वासनासंपरित्यागसमंप्राणनिरोधनं॥विदुस्तत्वविदस्तस्मात्तद
प्येतत्समाहरेत्वासनासंपरित्यागाच्चित्तंगछत्यचिंतनं॥प्राणस्पंदनिरोधाच्चयथेच्छसि

तथाकुरु॥असंगव्यवहारित्वाद्भवभावनवर्जनात्॥शरीरनाशेशैथिल्याद्वासनानप्रवर्तते॥
वासनाविभवेनष्टेनचित्तंसंप्रवर्तते॥द्वेबीजेरामचित्तस्यप्राणस्पंदनवासने॥एकस्मिंश्चि
तयोर्नष्टेक्षिप्रंद्वेअपिनश्यतइति॥अथयोगोपायनिरूपणं॥तत्रयतंजलिप्रोक्ताःकेचि
त्असंगात्पूर्वमेवोक्ताः॥अयमिहोपायक्रमः॥प्रथममानुमानाचार्योपदेशसमाधिगततत्
त्वविषयचेतोभिरतिस्तत्साधनभूतेयोगेश्रद्धांप्रसूतेतदनंतरमुत्साहः॥सोत्साहस्य
याश्चात्यासुभूमिकासुस्मृतिःतत्स्मरणादनुकूलंचित्तंयमनियमादिनिविष्टंसयोगांग
समाधिमनुभवति॥ततश्चाखिलयोगांगसंपन्नस्यप्रज्ञाप्रकर्षाद्भवतिसंप्रज्ञातःसमा
धिः॥तदभ्यासान्निर्दोषायाश्चपरवैराग्याद्भवतिअसंप्रज्ञातःसमाधिःइति॥सचकैवल्यहे
तुःसत्वपुरुषान्यताख्याति पूर्वोहिनिरोधश्चित्तमखिलकार्यकरणेनचरितार्थमधिका २३

रादवसादयति॥तत्रप्रथमंमैत्र्यादिभिः योगिनाचित्तंप्रसादैकार्यं॥ईर्ष्यादियुक्तस्यमनसो
जेतुमशक्यत्वात्॥तथाचगीतायां॥असंयतात्मनायोगोदुष्प्राप इतिमेमतिः॥वश्यात्मनातु
यतताशक्योवाप्तुमुपायतइति॥स्कंदपुराणे॥दुर्निवारामनोवृत्तिर्यावत्साननिवर्तते॥किं
वदंत्यपियोगस्यतावन्नेदीयसीकुतइति॥राजयोगे॥यावत्प्रयत्नलेशोस्तियावत्संक
ल्पकल्पनाः॥यावच्चमनसाप्राप्तिस्तावत्तत्वस्यकाकथेति॥हठप्रदीपिकायां॥यावन्नैवप्र
विशतिगतिंमारुतोमध्यमार्गेयावद्बिंदुर्नभवतिदृढःप्राणवातप्रबद्धः॥यावज्ज्ञानंस
हजसदृशंजायतेनैवतत्त्वंतावत्सर्ववदतियदिदंभमिथ्याप्रलापइति॥अमनसिद्धो
तावद्वैद्योप्यसिद्धोसोनरःसांसारिकोमतः॥यावद्भवतिरसद्रोणोदेहगोग्रहरूपकः॥य
सिद्धंतद्विजानीयात्कायमब्रह्मचारिणं॥जरामरणसंकीर्णं सर्वक्लेशसमाश्रयंतथा॥

पावद्दिमार्गगोवापुर्न्निश्चलोनेवमध्यगः।।असिद्धंतद्विजानीयाद्वायुंकर्मगुणान्वितं।।या
वत्प्रस्पंदतेचित्तंबाह्याभ्यंतरवस्तुषु।।असिद्धंतद्विजानीयाच्चित्तंकर्मवशानुगं।।तथाचप
तंजलिसूत्रं।।मैत्रीकरुणामुदितोपेक्षाणांसुखदुःखपुण्यापुण्यविषयाणांभावनातश्चित
मप्रसादनमिति।।अत्रसुखाहिशब्दास्तद्वत्पराः।।रागद्वेषकलुषीकृतस्यपुंसःसुखिनिद्
वेर्ष्यापुण्यवतिद्वेषःदुःखिनिचोपेक्षापापिनिचानुमोदनंजायते।।योगीतुसुखिनिमै
त्रींदुःखिनिकरुणांपुण्यवत्प्रीतिंपापिन्युपेक्षांभावयन्सकलखेदमूलरागद्वेषोसमूल
मुन्मूलयति ततश्चित्तंप्रसीदतिप्रसन्नचित्तस्यसुलभोयोगरतिरभिमतध्यानादपिचित्तं
स्थिरंभवतीत्येतदुक्तं।।यथाभिमतध्यानाद्वेतिसूत्रेण।।वासिष्ठे।।चित्तंकारणमर्थानां तस्मि
न्सतिजगत्त्रयंसिन्नसतिनजगत्किंचित्तस्यंप्रयत्नतःहस्तंहस्तेननिःपिष्यादंतान्दंतैर्विचूर्ण्य अ २४

च।।अंगान्यंगैःसमाक्रम्यजयेदाहौस्वकंमनः।विषयान्प्रतिभोःपुत्रसर्वानेवहिसर्वथा।।
अनास्थापरमाह्येषापायुक्तिर्मनसोजये।।एषैवपरमायुक्तिरन्यैवमहामदः।।स्वमनो
मत्तमातंगोद्वागित्येवविदम्यते।।चित्तस्यभोगैर्द्वौभागौशास्त्रंपंकंप्रपूरयेत्।।गुरुशुश्रूषया
भागमव्युत्पन्नस्यसत्क्रमे।।किंचिद्विज्ञप्तियुक्तस्यभागंभोगैःप्रपूरयेत्।।गुरुशुश्रूषयाभा
गोभागंशास्त्रार्थचिंतया।।व्युत्पतिमनुधावतस्यपूरयेच्चतसोन्यहं।।द्वौभागौशास्त्रवै
राग्यंद्वौध्यानगुरुपूजया।।प्रज्ञाविचारवशतःसममेवसदासुत।।नशक्यतेमनोजेतुंवि
नायुक्तिमनिंदितां।।अंकुशेनविनामत्तोयथादुष्टमतंगजः।अध्यात्मविद्याधिगमःसा
धुसंगमएवच।।वासनासंपरित्यागस्तथाप्राणनिरोधनं।।एतास्तायुक्तयःश्रेष्ठाःसंतिप्रा
णजयेकिल।।मनोपुयुक्तिश्चेतासुहठात्रियमयंतिये।।चेतस्तेदीपमुत्सृज्यनाशयंतितमोज

नैः॥विमूढाःकर्तुमुद्युक्तायेहठाच्चेतसोजयं॥तेनिवर्त्यंतिनागेंद्रमुन्मत्तविशनंतुमिरिति॥अ
थसुगम्यात्वादानुसंधानोपायोगोपायानिरूप्यंते॥हठप्रदीपिकायां॥इंद्रियाणांमनोनाथो
मनोनाथश्चमारुतः॥मारुतस्यलयोनाथःसलयोनादमाश्रितः॥अयमेवहितोपायोप्रा
प्तुवापिमनांतरे॥मनःप्राणलयोनादोनचकश्चिद्विमिंघते॥मनोमत्तेंद्रस्यविषयोधा ग
नचारिणः॥नियामनसमर्थोयंनिनादोनिशितांकुशः॥मकरंदंपिवन्भृंगोगंधान्नापेक्षतेय
थानादासक्तंतथाचित्तंविषयान्नहिकांक्षति॥कांक्षेप्रवर्तितोवह्निःकाष्ठेनसहशाम्यति
॥नादेप्रवर्तितंचित्तंनादेनसहलीयते॥विस्मृत्यसकलंबाह्यंनादेदृढंधावंश्चरः॥एकीभू
यात्यसहसाचिदाकाशेविलीयते॥श्रीआदिनाथेनसपादकोटिलयप्रकाराःकथिताज
यंति॥नादानुसंधानकमेवकार्यमन्यामहेनान्यतमंतयानां॥औदासीन्यंपरंभूत्वासदाभ्या ५ २५

सनसंयमी॥उन्मनीकरणंसघोनादमेवावधारयेत्॥की दृशंचौदासीन्यं॥शीतेकालेका
पटीवापटीवापथ्याहारेणपयोवापयोवाभक्ष्येभिक्षावृक्षमारण्यकंदपाणौद्रोणीका
त पराभोजपात्री॥उन्मन्यवृ त्तेर्यैशीघ्र्यंद्वौमार्गौममसंमतौ॥तत्वंपरमसौख्यंवानादोपा
सनमेववा॥सौख्यप्रविष्टचित्तानांमूढानामपिसंमतं॥यशीघ्रमानंदसंधायीजायतेनाद
जोलयः॥मुक्तासनस्थितोयोगीमुद्रांसंधायशांभवीं॥शृणुयाद्दक्षिणेकर्णेनादमंत
र्गतंसदा॥सर्वचिंतांपरित्यज्यसावधानेनचेतसा॥नादमेवानुसंधत्तेयोगसाम्राज्यमि
च्छता॥कर्णौपिधायहस्तेनयःश्रृणोतिध्वनिंमुनिः॥नादेवश्चित्तंस्थिरंकुर्यादावत्स्फुर
परंव्रजेत्॥अभ्यस्यमानोनादोयंबाह्यमावर्तयेन्मुनिं॥पश्चाद्विक्षेपमखिलंजित्वा ५५
योगीसुखीभवेत्॥श्रूयतेप्रथमाभ्यासेनादोनानाविधोमहान्॥धर्यमानेनताभ्यासेश्रू

यतेसूक्ष्मसूक्ष्यतं॥आदौजलदजीमूतभेरीमुर्मुरसंभवः॥मध्येमर्दलशंखाघ्यघंटाकाहलक
स्तथा॥अन्येतुकिंकिणीवंशवीणाभ्रमरनिस्वनाः॥इतिनानाविधोनादःश्रूयतेदेहमध्यगः॥
इतिश्रूयमाणेपिमेघभेर्यादिकेध्वनौ॥ततःसूक्ष्मात्सूक्ष्मतरंनादमेवपरामृशेत्॥घनमुत्सृ
ज्यवासूक्ष्मंसूक्ष्ममुत्सृज्यवाघनं॥परंतत्रैवनिःक्षिप्यमनोनान्यन्नचालयेत्॥यत्रकुत्रापि
वानादेप्रथमंविशतेमनः॥तत्रैवसुस्थिरंकुर्यात्तेनसार्द्धं विलीयते॥नादोवीजंहठः क्षेत्रमा
दासीन्यंजलंस्मृतं॥उन्मनीकल्पलतिकासद्यएवभविष्यति॥राजयोगे॥यत्रदृष्टिस्त
यस्तत्रभूतेंद्रियसना तनी॥स्याल्लक्तिःसर्वभूतानांदृष्टिर्लक्ष्येणसंगता॥ऊर्द्धदृष्टिर
धोवेधऊर्द्धवेधं [redacted] धोमुखः॥
आधायान्नविधानेनजीवन्मुक्तोभविष्यति॥सर्वतोविततादृष्टिःसंक्षिप्ताचशनैःशनैः॥

MEMORIAL

परतत्वमनादर्शेपश्यत्यात्मानमात्मना॥प्रथमंनिःसतादृष्टिःसंगतायत्रकुत्रचित्॥स्थि
रीभूताचतत्रैवविनश्यतिशनैःशनैःप्रसह्यसंकल्पपरंपराणांनिपूदनेसततसावधा
॥आलंबनाशादपचीयमानाशनैःशनैःशांतिमुपैतिदृष्टिःवेदशास्त्रपुराणोद्घाःसामा
न्यगणिकाइव॥एकैवशांभवीमुद्रागुप्ताकुलवधूरिव॥अंतर्लक्ष्यंबहिर्दृष्टिर्निमेषो
न्मेषवर्जिता॥एषातुशांभवीमुद्रासर्वशास्त्रेषुगोपिता॥हठप्रदीपिकायांअंतर्लक्ष्य
विलीनचितपवनोयोगीयद्यावर्त्तनेदृष्ट्यानिश्चलतायायाबहिरसोपश्यन्नपश्यत्यपि॥
मुद्रेयंखलुशांभवीनिगदितापुण्यैस्सदादुर्लभाभ्रूमध्येविवर्तितंस्फुरितयत्नतंयदंशो न्
भवं॥नादानुसंधानसमाधिभाजांयोगीश्वराणांहृदयप्रभुं॥आनंदमेकंबचसामवाच्यं ६
ना जानातित्वंगुरुनाथएव॥अर्द्धोन्मीलितलोचनःस्थिरमनानासाग्रदत्तेक्षणश्चंद्रार्कावि

क्लीनतामुपनयेन्निःस्पंदभावोन्नरे॥ ज्योतीरूपमशेषवर्णरहितंदेदीप्यमानंपरंतत्तंतस
दमेतिवस्तुपरमंवाच्यंकिमत्राधिकं॥ श्रीशांभव्याश्चरेवर्ण्याअवस्थांचलभेदतःतारे [redacted]
[redacted] ज्योतिषिसंयोज्यकिंचिदुच्चालयेद्भ्रुवौ॥ पूर्वयो
गस्यमार्गोयमुन्मनीकरणःक्षत्तेणो॥ केचिदागमजालेनकेचिन्नियमसंकुलाःकेचित्तर्के
णमुह्यंति नैवजानंतितारकं॥ चतुर्विधयोगावस्यासुनानाभेदःश्रूयते॥ अवस्या
श्चवक्ष्यंते॥ [redacted] ॥ब्रह्मग्रंथिर्भवेच्छिन्नआनं
दःशूंसंभवः॥ विचित्रक्षणिकोदेहोनाहतःश्रूयतेध्वनिः॥ विष्णुग्रंथिर्यदाभिन्नःपरमा

नंदसूचकः॥ अतिशून्यविभेदश्चभेरीशब्दस्तदाभवेत्॥ तृतीयंतुततोभित्वाविमायामर्दलध्व
निः॥ महाशून्यंतथायातिसर्वसिद्धिसमाश्रयं॥ चित्तानंदंततोभित्वासहजानंदसंभवः॥ रुद्र
ग्रंथिंततोभित्वासर्वपीठगतोऽनिलः॥ निष्पतोवैपवःशब्दःक्वणाद्वीणाक्वणोभवेत्॥ एकी
भूतंतथाचित्तंराजयोगाभिधायकं॥ सुरेश्वराचार्याः॥ प्राणेसुषुम्णांसंभासेनादोंतःश्रू
यतेमहान्॥ वंशदुंदुभिशंखाब्धिवीणावेणादिनादवत्॥ तत्रूनमात्तडिन्नारातारेशतपनो
पमं॥ ब्रह्मनाडीगतेप्राणेविंबरूपंप्रकाशयेत्॥ त्रिपुरासारसमुच्चयेनादोमात्रविधिः अ
थपार्ष्णिनिरुद्धकंदुमूर्ध्वजमूलार्पितसम्यगपार्ष्णिः॥ ऋजुकायशिरोधरोयतात्मा
विषयेभ्योविनिवर्तितेंद्रियश्चःकाकीचंचामिकुर्वीदर्मुहुरुदरदरीपूरयित्वासमीरैरंगु
ष्ठाभ्यामुभाभ्यांनौरंध्रपुटवरेतर्जनीभ्यांचनेत्रेनासारंधेनिरुध्यस्थिरविमलमतिर्मध्यमा

भ्यामथाभ्यंतुल्यभिर्न्नातिगाढंकमत्नजनिन्यस्थापयेन्मानसंस्वं॥यथाशक्त्याभ्यसंप्रतिदि
वसमेवंविदधनःसुषुम्णानश्चांपप्रविशतिशनैर्देहपवनः॥तदानारोनेजोभवतिसहजा
नंदजनकःक्रमाद्वीणावादिप्रहतकलवीणारवसमः॥ओदोमनालिमालाजनितरवसमस्ता
रहुंकारहारीनादोसौवांशिकस्यानिलभरितलसद्वंशनिस्वाननुल्यः॥भृंगानादानुकारीतद
नुचजलधिध्वानधीरोगभीरो[illegible]गर्जत्पर्जन्यघोषःपरदहकुहरेवर्त्ततेब्रह्मनाड्याः॥
विजितोभवतीहतेनवायुःसहजोयस्यसमुत्थितःप्रणादःअणिमादिगुणाभवंतितस्यामि
तपुण्यस्यमहागुणास्पदस्य॥सुरराजतनूजवैरिरंध्रेविनिरुध्यस्वकरांगुलिद्वयेनजलधे
रिवधीरनादमंतःप्रसरंतंसहसाशृण्वतिमर्त्यःपरिभावयतोपिनादमेनंत्रिदशाधीशत
नूजवैरिजातं॥सततंभवतीहतस्यजंतोर्गुणसंग्राहिरपेतकल्मषस्य॥शृंगान्यंगुलिभि

र्निरुध्यविधिवत्कोदंड्यःपंडितोमध्यरुद्रमरुन्निरुध्यवृषभश्चंचर्षणेंद्रियं॥साक्षा
त्तक्षणेभवेत्स्यन्निरोनैस्तृप्यंतगीतंपरंज्योतिस्त्रैपुरमंकमुक्तशशभल्लक्षावलक्षम्र
मिनि॥याज्ञवल्क्यः॥एवंवामुजयोपायःप्राणस्यतुवशानने॥शक्यमासनमास्थायस
माहितमनास्तथाकरणानिवशीकृत्यविषयेभ्योबलात्सुधीः॥अपानमूर्द्धमाकृष्यप्रण
वेनसमाहितः॥हस्ताभ्यांबंधयेत्सम्यक्कर्णादिकरणानिच॥अंगुष्ठाभ्यामुभेश्रोत्रेतर्ज्ज
नीभ्यांचचक्षुषी॥नासापुटेतथामाभ्यांप्रछादयकरणानिवै॥आनंदानुभवेत्तावत्ताव
द्ब्रह्मनिधारयेत्॥प्राणःप्रयातिनैवंततस्त्वामुर्विज्ञानकृत्॥ब्रह्मरंध्रेसुषुम्णायांश्रूणोतस्म
त्रवत्॥नादोत्पत्तिस्त्वनेनैवशुद्धस्फटिकसंनिभा॥आमूलाद्ब्रह्मनाडीवीणानादबहुस्थितः॥
शंखध्वनिनिभस्त्वादौमध्येमेघध्वनिर्यथा॥व्योमवर्त्मगतेनादेगिरिप्रस्रवणंयथा॥व्योमव

र्मगतेवायौचि नश्चात्मविंस्थिते॥ सदानंदीभवेद्योगीवायुस्तेनजितोभवेत्॥ इतिस्कंदपुराणे पवन
नेगगनंप्राप्तेध्वनिरुत्पद्यतेमहान्॥ घंटादीनांप्रवाद्यानांततःसिद्धिर्ततइति हठप्रदीपिकायां॥ अव जाय
ष्णपुगञ्जननासापुटनिरोधनंकार्यं॥ श्रीशुद्धसुषुम्णासरणेस्फुटममलःश्रूयतेनादःकाष्ठको
टिप्रसंगेननादमंतर्भ्रूणौ॥ पुराणस्पंदबोधायादिनाथेनोदितंवचः॥ मनःपाकमवाप्नोतिनि
रालंबाख्यद्वीटनंनादोपास्तिरतोनिसत्सवधेयाहियोगिनांनादश्रवणतासूक्ष्मंतेमंतरंगतु
रंगमःविशतेसर्वमेकाग्र्यंकुत्रचिन्नहिधावति॥ नादांतेणसारंगबंधेनवागुरायते॥ अंतरं
गतुरंगस्यबंधनेलीयतेपिच॥ घंटानिनादसंतत्स्यश्रद्धानिःकरणस्यचअनाहतस्यशब्दस्यतस्य
शब्दस्ययोध्वनिः॥ ध्वनेरंतर्गतंज्योतिर्ज्योतिरंतर्गतंमनः॥ यन्मनोविलयंयातितद्विष्णोःपरमंप
दंतावदाकाशसंकल्पोयावच्छब्दः प्रवर्ततेनिःशब्दंतत्परंब्रह्मपरमात्मासमीर्यतेयत्किंचिद्राम

रूपेणश्रूयतेशनकैरसा॥ यत्तच्छ्रोत्रानिरार्कैरःसएवपरमेश्वरः॥ नादकोटिसहस्राणिविंदुको
टिशतानिचसर्वतत्रलयंयांतियत्रदेवेनिरंजनइति॥ राजयोगे॥ चित्तेचलतिसंसारश्चले
लयःप्रजायते॥ तस्माच्चित्तंस्थिरंकुर्यादौदासीमपरायणः॥ यदाभवेदुदासीनस्तदातत्वं
प्रकाशते॥ स्वयंप्रकाशितेनत्वस्वानंदस्तत्क्षणाद्भवेत्॥ आनंदेनचसंतुष्टःसराभ्यासपरो
भवेत्॥ सदाभ्यासपरेभूतेनविधिर्नैवचक्रमः॥ नकिंचिच्चिंतयेद्योगिस्तदौदासीन्यपरोभवेत्॥
नकिंचिच्चिंतनात्तस्यस्वयंतत्वंप्रकाशते॥ स्वयंप्रकाशितेनत्वेतत्क्षणात्तन्मयोभवेत्॥ मनो दृ
श्यमिदंसर्वंयत्किंचित्सचराचरं॥ मनसस्तून्मनीभावोद्दैताभावंप्रचक्षते॥ जायमानामनस्कस्य
कठिणत्वं उदासीनस्यतिष्ठतः॥ मरुत्वंचशरीरस्यापिजायते॥ अमनस्करनिग्रेणसमूलोन्मूलितक्ष
ते॥ अंतःकरणशल्यंनसुरवीसंजायतेमुनिः॥ श्वासमात्रसमोपेतमिंद्रियालयसंकुलं॥ श

यमित्वामनोजालंमीनवद्यायतेसुखी॥प्रशांतेंद्रियवर्गोयंबुद्धिशक्तिसमन्वितः॥वायुनात्वपुनर्जित्वा
मनःशत्रुंसुखीभवेत्॥गुणत्रयमयीरज्जुःसुदृढात्मात्मबंधिनी॥अमनस्कक्षुरेणैवक्षित्वामोक्षम्
२० वासुयात्॥यथासंलीयतेसर्वमस्तंगच्छतिभास्करे॥करजालंतथाविश्वममनस्केविलीयते॥
द्रियग्राहभिर्मुक्तोनिर्वातेनिर्मलामते॥अमनस्कहृदस्नातःपरमात्मतमश्नुते॥प्रनष्टोच्छ्वासनिः
श्वासविध्वस्तविषयग्रहः॥निश्चेष्टोनिर्गतारंभोत्यानंदपतियोगिकः॥उच्छिन्नंसर्वसंकल्पै-
निर्गताशेषचेष्टकः॥स्वावगम्योलयःकोपिजयतांवागगोचरः॥एकदंडत्रिदंडादिजटाभस्मा
दिकंतथाकेशलुंचनंनग्नत्वंरक्तवस्त्रस्यधारणं॥उत्पन्नस्वावबोधस्यउदासीनस्यसर्व
दासदाभ्यासरतस्यैतन्नकुत्राप्युपयुज्यते॥तदादृष्टिविशेषाश्चविविधान्यासनानिच॥अं
तःकरणभावाश्चयोगिनोनोपयोगिनः॥सदाजाग्रदवस्थायांसुप्तवत्योवर्तितेनिश्चा

MEMORIAL

सोच्छ्वासहीनश्चनिश्चिंतमुक्तएवसः॥निद्रादोजागरस्यांतेयोभावस्तूपजायते॥तंभावंभावये
द्योगीनिश्चिंतमुक्तएवसः॥यथासुप्तोत्थितःकश्चिद्विषयान्प्रतिपद्यते॥जागर्त्येवततोयोगिगो
गनिद्राक्षयात्तथा॥औदासीन्यामृतोद्बोधवर्द्धमानेनयोगिना॥उन्मूलितमनोमूलोजगत्
द्दक्षःपतिष्यति॥यदायत्रयथायस्मात्स्थैर्यंभवतिमानसंतदातत्रतथातस्मान्नतुचाल्यं
कदाचन॥यत्रयत्रमनोयातिनिवार्यैतत्ततःततः॥अचारितंमनस्तस्मात्स्वयमेवविलीयते॥नि-
वार्यमाणंयत्नेनचलत्कर्तुनैवशक्यते॥उन्निष्ठनिक्षणेनैवमारुतस्यवशादतः॥दुर्निवार्यंमनस्तावद्
धावनत्वंनविंदति॥विदितेनपरेतत्वेमनोनौस्तंभकाकवत्॥यथानुलानुलाधारश्चंचलोऽपि
[redacted]उस्तेस्थिरः॥जातेसौख्यंसदाभ्यासान्मनोवृत्तिस्तथात्मनि॥निश्चिंतकतकेवि-
द्यायफलुषंयद्वन्नवंत्रमलंनिर्वातस्थितनिस्तरंगमुदकंस्वच्छस्वभावंपरं॥तद्वत्सर्वमिदंवि-

यसहसादेदोप्यतेनिः कलंतत्तंतत्सहजस्वभावममलंजानेमनस्केध्रुवं॥तस्मात्पाराप्रकृतवि
षयंनिःकृत्वाध्यात्मयोगाद्वायोर्नाशस्तदनुमनसस्तद्विनाशश्चमोक्षः॥सच्चिदेवंसहजममलंनिः
कलंनिर्विकारंप्राप्यैमत्वंकुरुतकुशलाः पूर्वमेवामनस्कं।चतुर्विधामनोवस्थाविज्ञात व्याम्
नीषिणा॥विश्लिष्टंचगतायातंसुश्लिष्टंचसुलीनकंविश्लिष्टनामसंप्रोक्तंराजसंतुगतागतं।
सुश्लिष्टंसात्विकंप्रोक्तंसुलीनंगुणवर्जितं॥विश्लिष्टंचगतायातंविकल्पंविषयग्रहं॥सुश्लिष्टं
(illegible)चसुलीनत्वंविकल्पविषयापहं॥ततोभ्यासनियोगेननिरालंबंभवेद्ध्रुवं॥तदा
समरसीभूतंपरमानंदमेवतन्नसानंदंनिश्चलेचेतस्ततःसुश्लिष्टमुच्यते॥अतीवनिश्चली
भूतंसानंदंचसुलीनकंअभ्यस्यतोमनःपूर्वंविश्लिष्टंचलमुच्यते॥ततश्चलाचलंकिंचि
त्सानंदंचगतागतं॥एवंभूतस्यकर्माणिपुण्यानिसंशयानिच॥प्रयांतिनैवलिंपंतिक्रियमा ३१

णानिसाधुनेतियोगारूढस्यस्वरूपंवदन्तस्यैवसमाधिरभ्यासदशायांब्रह्मानंदाविर्भावं
माहभगवान्वासुदेवः॥तथाहि॥यदाविनियतंचित्तमात्ममेवावतिष्ठते॥निस्पृहःसर्व
कामेभ्योयुक्तइत्युच्यतेतदोद्दीपारम्यर्क्षतेयोगयुक्तात्मासर्वत्रसमदर्शनइत्यंतेन श्रु
तिश्च॥समाधिनिर्द्धूतमलस्यचेतसोनिवेशितस्यात्मनियत्सुखंभवेत्॥नशक्यतेवर्णयितुं
गिरातदास्वयंतदंतःकरणेनगृह्यतेइति॥विद्यारण्यश्रीपादाः॥यावद्यावदहंकारोविस्मृ
तोभ्यासयोगतस्तावतावत्सूक्ष्मदृष्टिर्निजानंदोनुभूयते॥यद्यप्यसौचिरंकालंसमाधिर्दृ
ढोभवेन्न॥तथापिक्षणिकोब्रह्मानंदंनिश्चिनोतियतेयसाविति॥पातंजलेपि॥गुणभेद
श्चितस्यचतस्रोवस्थाउक्ताः व्युत्थानं॥समाधिप्रारंभःएकाग्रता॥निरोधश्चेति॥एषातुत
त्रमक्रियात्रिगुणात्मकप्रकृतिकार्यत्वाच्चेतयित्रिगुणंप्रकृतिःपूर्वमेवोक्तात्वनिरूपणा

नसरे॥गुणास्तुसत्वरजस्तमांसि॥तत्रसत्वंप्रसादप्रकाशधर्मशीलंरजः प्रवृत्तिपरितापशोकादिधर्मशीलं॥तमस्तुप्रवृत्तिविरोधिस्थित्यारब्धधर्मशीलंगौरवावरणदैन्यादिधर्मशीलंचएवं चत्वित्तस्यैतादृशगुणत्रयवत्त्वाद्गुणत्रयस्यचपरस्परोपष्टंभोपमर्दकरूपविचित्रपरिणामभेदेन क्षिप्तमूढविक्षिप्तैकाग्र्यनिरोधाख्यभूमिशद्वितायःपंचावस्थाभवंति॥तत्रक्षिप्तंरजसोनेषु वाविषयेषुसुपादिषुप्रेरितमत्यंतमस्थिरंमूढंतमसानिद्रावृतिमन्मूर्छाघुपेतंक्रोधादिभिः कृत्याकृत्यविवेकशून्यंपरापकारनिरतंविक्षिप्तंपुनर्द्विशिष्टंवैशिष्ट्यंचास्यैमबहुलंल का दा क्षिप्तस्यैमायद्यत्रसत्वोद्रेकोप्यस्तितयापिसत्वात्किंचिदूनरजस्कमस्यैष्टत्वात्॥ऐश्व र्यशब्दादिविषयेषुचप्रियंभवतिसत्वप्राधान्याच्चतत्वंप्रणिधित्सदयितत्वस्यैतमसाविहि तत्वादणिमादिकमैश्वर्यमन्यमानंप्रणिधित्सति॥प्रणिधंतेचक्षणं॥अथरजोंशेन

क्षिप्यमानंतत्रास्तुस्थितितत्रप्रियमात्रंभवति॥शब्दादिषुस्वरसवाहित्वेननिरूढप्रेमत्वमि तिक्षिप्तैकाग्र्यवित्तस्यसमाधेर्विक्षेपोपसर्जनतयायोगेऽनुपयोगित्वमिति॥सर्वेप्यत्रवृत्ति विरोधेपरंपर्यणाप्यमोहसाधनत्वाभावाद्धेयत्वमिति॥तिस्रोप्येताभूमयोहेयाएवए काग्रनिरुद्धेतुभूमीसत्वोत्कर्षाधिक्रमंवहिर्वृत्तिनिरोधसर्वसंस्कारविलयद्वारेणसमा ध्युपयोगिन्यावित्युपादेये॥तत्रैकाग्र्यमेकतानं॥अत्रहिचित्तमाविर्भूतसत्वमयंगतत मःपटलमपिरजोमात्रयासंस्पृष्टत्वाद्धर्मज्ञानवैराग्यैश्वर्योपगमंभवति॥यथासंप्रज्ञात समाधिसंपत्रयोर्मधुमतीभूमिकप्रज्ञाज्योतिषोर्मध्यमयोगिनापेतसत्वंनिरुद्धं तुसकलवृ तिकसंस्कारमात्रशेषं॥यथातिक्रांतभावनीयस्ययोगिनश्चितसत्वमपगतरजोलेशमलं स्वरूपप्रतिष्ठंअभ्यासवैराग्योपपुष्टपाकप्रबंधविधूतरजस्तमोमलस्यबुद्धिसत्वंनूनंयस्य

[redacted] स्वरूपप्रतिष्ठायांविषयेंद्रियप्रत्यान्हतस्यानवसिता
धिकारकतयाचकार्यकारिणोविवेकख्यातिपरंकार्यविषेमयशिष्यतइति॥अत्रभावनीयपद्र
मान्यातिरिक्तवस्तुपरं॥एवंचैकाग्रेबहिर्वृत्तिनिरोधः॥निरुद्धेचसर्वासांवृत्तीनांसंस्कारस
हितानांप्रविलयइत्यनयोर्भूम्योर्योगस्यास्तिसंभवइति॥तत्रक्षिप्तमूढेचित्तभूमीव्यु
त्थानंविक्षेपभूमिः सत्वोद्रेकात्समाधिप्रारंभःएकाग्रतानिरोधःपर्यंतभूमी॥प्रतिपरिणा
मंचसंस्कारेण॥तत्रव्युत्थानजनिताःसंस्काराःसमाधिप्रारंभजैःसंस्कारैर्हन्यंते॥तज्जाश्चैका
ग्रताजैःएकाग्रताजनितैःनिरोधैः॥निरोधजाअपिसंस्कारास्तैरेवहन्यंते॥यथासुवर्णसंव
रलितंध्यायमानंसीसमात्मानंसुवर्णमलंचनिर्हरति॥एवमेकाग्रसंजनितान्संस्कारान्नि

रोधजाआत्मानंचनिर्हंतीति॥अथोक्तोपायैःस्थिरचित्तस्ययोगिनःक्रमेणसविकल्पकसमा
धिप्रकाराआविर्भवंतितत्रो संप्रज्ञातारव्योनिर्बीजःसमाधिश्चाविर्भवतीत्येतत्प्रदर्शनपरा
णियतंलिसूत्राणिव्याख्यास्यंतेतानिप्रदर्श्यंते॥क्षीणवृत्तेरभिजातस्येवमणेर्ग्रहीतृ ग्र
हणग्राह्येषुतत्स्थतदंजनतासमापत्तिः॥उक्तोपायैर्लब्धस्थितिकस्यस्फटिकमणेरिवस्व
भावतःसुस्पष्टरजस्तमोभ्यामनभिभवेमहाभूततन्मात्रस्थूलसूक्ष्मरूपग्राह्यैकाग्रतापू
र्विकाग्राह्यमयतारूपाग्राह्यसमापत्तिः॥ततोरजस्तमोलेशानुविद्धांतःकरणैकाग्रता
पूर्विकातन्मयतारूपाग्रहीतृसमापत्तिश्चभवति॥सत्त्वेनतस्यत्वंतदेकाग्रतातदंजनत्वं
तन्मयत्वं॥न्यूनेभूतेचित्तेविषयस्यभाव्यमानस्यचोत्कर्षेतयाविधासमापत्तिस्तद्रूपः

परिणामस्त्वर्थः ॥ सावसमापत्तिः सविकल्पनिर्विल्पसविचारनिर्विचारभेदेनचतुर्विधा ॥
तत्रशब्दार्थज्ञानविकल्पैः ॥ संकीर्णासवितर्कायस्यांसमापत्तौशब्दार्थज्ञानविकल्पसंभिन्नः स्थूलावभासःसासविकल्पासमापत्तिः स्मृतिपरिशुद्धौस्वरूपशून्येवार्थमात्रनिर्भासा निर्वितर्कायदाश्रुतमर्थमात्रप्रवणेनचेतसाअर्थमात्राविष्टेनतदभ्यासात्रांतरीयकतानुयगतासंकेतस्मृतिस्वरूपतानयोगेचश्रुतानुमानविकल्पौतन्मूलौमक्तौतदातच्छ्रुन्यायांसमाधिप्रज्ञायांस्वरूपमात्रेणैवस्थितोर्थः ॥ तत्स्वरूपतयैवतुविकल्पनेतेनाकारेणापिविघटतेसास्थूलविषयासतीनिर्वितर्कासमापत्तिः ॥ एतयैवसविचारानिर्विचाराचसूक्ष्मविषयाव्याख्यातासूक्ष्मस्तन्मात्रेंद्रियादिःशब्दार्थविकल्पसहितत्वेनदेशकालधर्मावच्छिन्नःसूक्ष्मार्थःप्रतिभातियस्यांसासविचारासमापत्तिः ॥ देशकालध

र्मादिरहितोधर्मिमात्रनयासूक्ष्मोर्थः प्रतिभातियस्यांसानिर्विचारासमापत्तिः ॥ सायोगिनामेवपरंप्रत्यक्षाअसदारोपगंधस्याभावात् ॥ एतासुचसमापत्तिषुसवितर्कास्थूलविषयामपेक्ष्यनिर्वितर्क्यायाःप्राधान्यंततोपिसूक्ष्मविषयायाःसविचारायास्ततोपिनिर्विकल्परूपायाःप्रधानपर्वतसूक्ष्मार्थविषयायानिर्विचारायास्तस्याश्रपिनिर्विचारायाः ॥ प्रकृष्टाभ्यासवशान्नैर्मल्येविनंक्ष्यतोवासनारहितंस्थितिप्रवाह्योयंभवति ॥ ऋतंभरातत्रप्रज्ञा ॥ तदाचविपर्यसगंधेनापिनसंस्पृष्टात्मतांनरारब्धाप्रज्ञाजायते ॥ श्रुतानुमानप्रज्ञाभ्यासमविषयविशेषार्थत्वात् ॥ यात्रर्तंभराप्रज्ञाशब्दानुमानज्ञानविलक्षणासूक्ष्मव्यवहितानूविषयान्स्फुटेनैवरूपेण भासयति ॥ तथाचभाष्यंक्रान्दिरुक्तोलितंश्लोकद्वयंप्रज्ञाप्रासादमारुह्यअशोच्यःशोचतेजनानभूमिष्ठानिवशैलस्थःसर्वान्प्राज्ञोनुपश्य

नि॥आगमेनानुमानेनध्यानाभ्यासरसेनचत्रिधाप्रकल्पयन्प्रज्ञांलभतेयोगमुत्तममिति॥तज्जः संस्कारोन्यसंस्कारप्रतिबंधीएतज्ज निश्चैतैसंस्कारैर्विक्षेपजाःसंस्काराःकार्यक्षमाभवंति॥ तएवसबीजःसमाधिःनरेवमुक्ताश्चनस्त्रः समापत्तयः॥सहबीजेनालंबनेनवर्तनइतिस्यु त्प्रज्ञासबीजःसमाधिरित्युच्यते॥यःसविकल्पःससंप्रज्ञातसमाधिरितिपूर्वमुक्तः॥तस्या पिनिरोधेसर्वनिरोधान्निर्बीजःसमाधिः तस्यापिसबीजस्यापिप्रविलयेसर्वसंस्कारनिवृत्तौना स्वकारणप्रविलयायासंस्कारमात्रावृत्तिरुदेतितस्यानेतिनेतिकेवलंपर्युदासनाविकल्पा कोनिर्बीजाख्योऽसंप्रज्ञातसमाधिर्भवति॥यस्मिन्सतिपुरुषःस्वरूपमात्रज्योतिःप्रतिब शुद्धोभवतिश्रयमेवनिर्बीजसमाख्योयोगःपरमपुरुषार्थहेतुःनैतद्धृतिरेकेणमोक्षसंभावना प्यस्ति॥अत्रचश्रुतिस्मृतीतिहासपुराणादिवाक्यंप्रमाणं॥वासिष्ठे॥दुःसहारामसंसारवि

षवेगविरेचिका॥योगगरुडमंत्रेणापावनेनोपशाम्यति॥गरुडपुराणे॥तयापतेतमतिमान यास्यान्निर्वृतिः परा॥योगेनलभ्यतेसानुनान्येनतुकेनचित्॥भवतापप्रतप्तानांयोगोहिपर मौषधं॥पराबरमसत्काधीर्यस्यनिर्वेदसंभवा॥सचयोगाग्निनादग्धसमस्तक्लेशसंचयः॥ निर्वाणंपरमंसर्वप्रामोत्यपिनसंशयः॥संमात्यमेवसिद्धिस्तुपूर्णेपत्स्यात्मदर्शनात्॥नकिं चिद्दृश्यतेकार्यनैवसकलंकृतं॥आत्मारामःसदापूर्णःसुखमात्मनिकेवलः॥अतस्तसा दिनिर्वेदःसदानंदमयस्यच॥नयसाभावितात्मानोयोगिनःसंयतेंद्रियाःप्रतरंतिमहात्मा नोयोगेनेवमहाणवमिति॥याज्ञवल्क्यस्मृतौ॥ईज्याचारदमाहिंसादानस्वाध्यायकर्म णां॥अयंतुपरमोधर्मोयद्योगेनात्मदर्शनमिति॥महर्षिमातंगः॥अग्निष्टोमादिकाम्पज्ञा न्विहायद्विजसत्तमः॥योगाभ्यासरतःशांतःपरंब्रह्माधिगच्छति॥ब्रह्मक्षत्रियविशांस्त्री

ग्राड्स्यचयावने॥शांतयेकर्मणामंत्रयोगान्नास्तिविमुक्तये॥कूर्मपुराणे॥शिववाक्यंव्रतः
